नादिनो अनादरो अनादिने इत्यादि शेषं ग्रामणीवत् अर्थ वक्ष्यमाणं कं किं पीलुने फलाय अस्थि
दधिसक्थ्यक्ष्णामनङ् उदात्तः एषामनङ् स्यात् टादावचि सर्वो दातः अल्लोपोन दध्ना दध्ने दध्नः द
ध्नोः दध्नां दध्नि दधनि दध्नोः शेषं वारिवत् एवमस्थिसक्थ्यक्षि शब्दाः तदंतस्याप्यनङ् स्यात् प्रियद
ध्ना प्रियदध्ने अल्लोपेन प्रियसक्थ्ना प्रियास्थ्ना प्रियाक्ष्णा इत्यादि सुधि सुधिनी सुधीनि सुधिया सुधिने त्या
दि एवं प्रध्यादयः मधु मधुनी मधूनि हे मधो॥ हे मधु पुनस्तद्वत् मधुना मधुन्यां मित्यादि ए
वं पुं स्त्र्याद्यादयः सान्वाक्षस्य सुवा सुमा॥ दाविति केचित् मान्वूनि सूनि इत्यादि सुलु
सुलुनी सुलूनि सुल्वा सुलुने इत्यादि प्रि यक्रोष्टु प्रियक्रोष्टुनी प्रियक्रोष्टूनि स्त्र
यमावः प्रियक्रोष्टूणि हे प्रियक्रोष्टु हे प्रि यक्रोष्टो टादौ पुंवत् पक्षे प्रियक्रोष्ट्रा प्रिय
क्रोष्टुना अन्यत्र तृज्वद्भावा नुम्बिधिप्रतिषेधेन॥ नुम् प्रियक्रोष्टु प्रियक्रोष्टवे प्रियक्रोष्टुने प्रि
यक्रोष्टुनां धातृ धातृणी धातॄणि हे धातः हे धातृ द्वितीयाप्रथमावत् धात्रा धातृणेत्यादि एवं ज्ञा
तृकर्त्रादयः एतस्य कानाद्येरा कस्वेकारा टीतस्य इनेव स्यात् प्रद्यु प्रद्युनी प्रद्यूनि प्रद्युना प्रद्युने
त्यादि प्ररि प्ररिणी प्ररीणि प्ररया प्ररिणा प्ररीणां प्ररासि रित्यादि सुनु सुनुनी सुनूनि सुनावा
सुनुने त्यादि तः इत्यादंता नपुंसकलिंगाः तः होह: झलि पदांते वा हस्य ढः स्यात् हलूद्या

क्षितिसुलोपः जस्तु सर्वे लिट् लिड् लिहौ लिहः लिहं लिहौ लिहः लिहा लिड्भ्यामित्यादि स्त्रगिव
तिवर्णं लिट्सु दादेर्धातोर्घः हकारादेर्धातोर्हस्य घः स्यात् झलि परतः पदांते च एकाचो बशो भष्
झषंतस्य बशः स्थाने भष् स्यात् सकारे ध्वशब्दे च परे प्रावृषिप्रतिकस्य संज्ञस्य झलि पदांते च धुक् धुग्
दुहौ दुहः दुहं दुहौ अंक इत्यादेः कासंज्ञा इत्यर्कः कर्षकतरो कर्मधारयः इतरः साक्षेपस्यैकैव
संज्ञा ज्ञेया तेन नामादावचिन संज्ञैवन पदसंज्ञा॥ अतो धात्वंतस्य अस्य तपूर्वा संनेन दुहः दुहा धु
ग्भ्यामित्यादि वर्णं वर्णं धुक्षु वाऽऽहसुहृदुह॥ जिह्वां ग्रहां हस्य वा स्यात् झलि पदांते च धुक्
ध्रुक् ध्रुट् ध्रुड् द्रुहौ द्रुहः द्रुहं द्रुहौ द्रुहः द्रुहा ध्रुग्भ्यां ध्रुक्षु ध्रुट्सु एवं मुह स्नुह
ष्णिहः वाह अहस्पस्य वहो वा शाक्षस्य अद्रू स्यात् टइत् पचधत्फटसु इति वृद्धिः विश्वौह
॥ विश्वौहेत्यादि शेषं लिहवत् कवि संते सवर्णे दीर्घः तुराट् तुराड् तुराहौ तुराहो तुराहः
तुराहं तुराहौ तुरहः तुरहेत्यादि शेषं लिहवत् तस्यानडुहो रागमः अनयो सर्वनामस्थाने आ
मुस्यात् सर्वो दातः स्यावनडुहः अमन्त अमस्यात् सोपरे सोर्लोपः संयोगांतस्य लोपः अमूविधि
सामर्थ्यात् नस्त्यं स्थितिदशे न संयोगांतस्य लोपस्यासिद्धिस्यात्र लोपेन अनड्वान् अमसंबुद्धौ
तत्र नडहोः संबुध्यमस्यात् अमोपवादः हे अनडुन् अनड्वाहौ अनड्वाहो अनड्वाहः अनडु

हे अनड्वाहो अनडुहः अनडुहा वसुस्रंसुध्वंस्वनडुहां दः सांतवस्त्रंतस्यसंमादेशदःस्यात् झलिपद
न्तः पदांतेच अनडुद्भ्या मित्यादि सांतेतिकिं विद्वान् नदंतविधिरत्रेष्यते शिखानड्वाहो शिखान
ड्वाहः अनडुहः स्त्रियामामवानाम्यः गौरादीत्पाठात्ङीप् अनडुही अनड्वाही श्वेतवाङ्क्वक
त्राखकरारडाशवयाजां डस्य पदांतस्य इतिवाच्यं डदत् दिवमामध्यादिवस्यापिसेलोपः अत्वसंतस्य
धातोः अत्वसंतस्यासंबुद्धौ उपधायादीर्घःस्यात् अ॥ संबुद्धौसोमंतुधातोः श्वेतवाः श्वेतयाः पुरोडाश्च
यतेश्वेतदीर्घः संबुद्धौ निपात्यते वकाराङ्क्यं ग्राः हेश्वेतवाः वेति केचित् हेश्वेतवः श्वेतवा
हौ श्वेतवाहः श्वेतवाहं श्वेतवाहौ अदूवा स्येतिकेचित् श्वेतौहः श्वेतवाहः श्वेतवा
हा श्वेतौहा श्वेतवोभ्यां श्वेतवोभि रित्यादि श्वे नवस्तु श्वेतवःसु इस्यपदोरुते सहेःसाढस्य
साढरूपस्यसहेःसमासर्वनः तुराषाट् तुराषाड्॥ तुरासाहौ तुरासाहः तुरासाहा तुराषाड्भ्या मित्या
दि दिवउत् दिवःप्रातिपदिकस्य अंतस्य सोपरे तरत् अलोंत्यस्य अनल्विधावितिफलोस्तास्थित
स्येन स्थानिवद्भावाभावात् हल्ङ्याब्भ्य इति सुलोप सुद्यौः सुदिवौ सुदिवः दिवोवाग्रहणमितिकेचित् सुद्याः
सुदिवं दिवउत् दिवोंतादेश उकारःस्यात् पदांतेच सुद्युभ्यां सुद्युभिः इति रेफांतचत्वारस्त्राद्यो नित्यं
बहुवचनांतः चत्वारः चतुरः चतुर्भिः चतुर्भ्यः २ षट्चतुर्भ्यश्च षट्संज्ञकेभ्यः चतुरश्च परस्यामो नुट् ण १७

॥ वाम्पम्पोच आपाग्रमः इकोयणचि अत्नोहीं ॥

॥रश्चियायथ्याराथसमपवियवसाः ॥२ ॥इदमस्तदायश्चनमकारस्यपकारः नभावइदस्अतिप्तीति त्यराद्यरोनस्तमकारा कारस्यगुणसंज्ञा ॥६
॥इस्सर्वेकरामुत्रपरामेरस्यामृतीतिविभ्रदे क्विपूर्वेतिक्विप्रत्ययः हर्वेवशादिसर्वोः अतुनाश्रिक्स क्विपूकलोः किंतिच अनुनासिकांतस्यो
पधायादीर्घोस्वतिझलादौक्किति परे ॥४

सं क्विये चतुर्णां रोषुपि सप्तमीबहुवचनेरोरेवविसर्गो नान्यरेफस्य षत्वं यस्य क्विबंतप्ने शरोऽसि प्रवि
परेशाराभासस्ते: चतुर्षु प्रियचत्वाः हेप्रियचत्व प्रियचत्वारौ इत्यादि गौणत्वेनुमृट्प्रेष्यते प्रियच
तुराम् प्रशान्स्यापदेवपरम सत्वर्णम् मोनोधातोः धातोर्मस्यनःस्यात् झलिपदांतेच मत्वस्यासिद्ध
त्वान्नलोपान प्रशान् प्रशामौ प्रशामः प्रशामम् प्रशामौ प्रशामः प्रशामा प्रशान्भ्या मित्यादि
॥२॥ नाद्यसक ॥ किमःकः किमःकस्यात् विभक्तौ अकच्सहित तस्याप्ययमादेशः कः कौ के कामदेशस्य संस्था
निवद्भावेनंगकार्यम् केन काभ्या मित्यादि सा इदमोमः इदमोमस्य मःस्यात् सौ त्यदा
द्यंतापवादः इदोय्युंसि इदम इद्स्थाने अयःस्यात्पुंसि सोर्लोपः अयम् त्यदाद्यत्वे
कृते अतोगुणे अपदांतात् अकाराद्गुणेपररूप: पररूपमेकादेशःस्यात् दश्च इदमोदस्य मः
स्यात् विभक्तौ इमौ इमे त्यदादेः संबोधनंनास्ति वः इमम् इमौ इमान् अनाप्यकः आदिति टा
इत्यारभ्यसुपः पकारेण प्रत्याहारः अककारस्य इदम इदोऽन्स्यादापिविभक्तौ अनेन हलिलो
पः अककारस्यइदम इदोलोपःस्यादापि हलादौ नाऽनर्थकेऽलोंत्यविधिः आद्यंतवदेकास्मिन् एकस्मि
न्क्रियमाणंकार्यमादाविवान्तइवस्यात् सुपिचेतिदीर्घः आभ्यां नेदमदसोरकोः अककारयो
रिदमदसोर्भिस ऐस् न स्यात् एभिः अस्मै हेःस्मे पश्चात्लोपः अस्मै आभ्याम् एभ्यः अस्मात्

॥अनेनसूत्रेणइदोरस्यैवलोपेप्राप्तेनात्रेतिपाठः ॥३अलोंत्यस्येति विधिर्लोपरूपो न अनर्थकत्वात्तेन इदोलोप एवेतिभावः ॥३

॥अकुमाकिंचितकियादिकंविभक्तेकवितयुनतनन्पेनवाशेनान्यविधंतकित्याः॥१ ॥सर्वनामस्थानेचासंबुद्धौ इति उपधादीर्घः॥३
॥राजनइत्यस्यनलोपः सुपिचेतिसिद्धः स्यान्सु पीत्यनेनाविधेयतेमात्रमनविधेयम्॥४॥ ॥हल्ङ्याब्भ्य इति सोर्लोपः॥५

आभ्याम् एभ्यः अस्य अनयोः अस्मिन् अनयोः एषु ककारयोगेतु इमकेन इमकाभ्याम् इम
कैः इत्यादि क्विताद्यादेशाः क्विताद्यादेशो परत इदमेतदेपरस्यादेशः स्याद्वादेशो व
कंसंयुक्तंकिलोपो रवादेशः एतम् एतौ एतान् एतेन एतयोः उपधादीर्घः सोर्लोपः नलो
पः राजा संबुद्धौ नलोपोनस्यात् डौ संबुद्धौ च हेराजन् राजानौ राजानः राजानम् रा
जानौ अल्लोपः कर्मणि राज्ञः राज्ञा नलोपः सुप् स्वरसंज्ञा विधिषुकृति सुविधौ स्वरविधौ संज्ञा
विधौ कृति तुग्विधौ च नलोपोसिद्धो नान्यत्र राजा अत्यादौ इत्यसिद्धत्वादात्रमेत्वमिस्तु
नस्यात् राजभ्याम् राजभिः राज्ञि राजनि इत्यादि प्रतिदिवन् अत्र नविधौ अ
ल्लोपस्योपधायां नेतिदीर्घविधौ स्थानिव आनात् वर्णीदीव इत्यादि नसंयोगाद्व
मन्तात् वकारमकारान्तात्संयोगात्परस्यानो कारस्यलोपोनस्यात् यज्वनः यज्वना यज्व
स्यामित्यादि ब्रह्मणः ब्रह्मणा इत्यादि अपि राजवत् सोवदन् हन्पूषार्यम्णाम् असंबुद्धौ
सोचोपधाया दीर्घः स्यात् नान्यत्र वृत्रहा हेवृत्रहन् एकाजुत्तरपदेणः धातिपदिकान्तस्य
वृत्रहणौ वृत्रहणः वृत्रहणं वृत्रहणौ होहन्तेर्ञ्णिन्नेषु ञितिणितिप्रत्यये नकारेचपरे हन्ते
र्हस्य कत्वं स्यात् वृत्रघ्नः वृत्रघ्ना

॥वुरूदनुत्राइत्यनेदः हन्तिर्हिंसा गत्योः वृत्रान्लिन्तपणपनं वत्यांणंरवानितिविग्रहे ×द्वितीं×१
न्तन्तवत्ततवानेत्वन्तेडुक्विप् इति क्विप्प्रत्ययः एकाजुत्तरपदेणः नसंख्या सलोपः ॥अनचिवेतिद्वित्वम्॥१

१८

॥वृद्धयर्थपृषमा॥२ ॥मघवानबहुलमितिबहुलग्रहणात् संयोगान्तस्यलोपस्यासिद्धत्वेननतेनसर्वनामस्थानेत्युपधादीर्घः॥२
॥धातोरुगितश्चेत्युगितोलोपिनोनंतरेन॥३ ॥श्वयुवमघोनामतद्धिते वकारस्यसंप्रसारणं इदं संप्रसारणसंज्ञं स्यात्॥४
॥संप्रसारणेमघवन्इति स्थितेसंप्रसारणे कारस्योकारेणपूर्वरूपैकादेशेमघउन्इतिजाते आद्गुणेमघोनः॥६

हलङ्याभ्यो मित्यादि एवं शार्ङ्गिन् यशस्विन् अर्यमन् पूषन् उक्षन् असः पूष्णि पूषणि पक्षेडौ हलोपो नेति
केचित् द्यषि मघवा बहुलं इत्येतस्मात् अत इत्यन्तादेशः कृत्यत् उगित्सर्वनामस्थानेधातोः अ
धातोरुगितो नलोपिनो सातश्नुमागमः स्यात् सर्वनामस्थानेपरे सर्वनामस्थानपरेचेतिउपधादी
र्घः मघवान् इत्यादि सुटि राजवत् इग्यणः संप्रसारणं यणः स्थानेभूतोलाक्षीयाद्इक्संप्रसा
रणसंज्ञं स्यात् श्वयुवमघोनामतद्धिते अन्नन्तानामेषामतद्धितेपरे संप्रसारणं स्यात् संप्रसा
रणाच्च संप्रसारणादचिपूर्वरूपमेकादेशः स्यात् आद्गुणः मघोनः मघोना मघवस्या
मित्यादि अतद्धितेकिं माघवनं फलं अ नःअना श्वस्या मित्यादि युवन् शाद्धेत्व
स्यज्ञासूत्रे नसंप्रसारणे संप्रसारणं संप्रसारणे परतः पूर्वस्यणः संप्रसारणं न स्यात् इति
यकारस्यनेह अतएवज्ञापकादन्त्यस्ययणः संप्रसारणं यूनः यूना युवस्या मित्यादि अर्वा हे
अर्वन् अर्वणस्त्रसावनञः नञ्पूर्वकस्यार्वणस्तृ इत्यादेशः स्यात् असोऽत्ययेपरतः अर्वन्तौ अ
र्वन्तः अर्वन्तं अर्वतो अर्वतः अर्वता अर्वद्भ्या मित्यादि अनञ् किं अनर्वा अनर्वाणौ इत्यादि॥
यज्वन्वत् पथिमथ्यृभुक्षामात् एषां सौपरे आकारान्तादेशः स्यात् इतोऽत्सर्वनामस्थाने पथ्यादेरि
कारस्य अकारः स्यात् सुटि थोन्थः पथिमथोस्थस्यन्थादेशः स्यात् सुटि स्यानिवत्त्वात् नमो
नस्यादेशस्तेस्यान्विदादेशोनन्विधावितिस्थानिवत्त्वात्नात्ववः ततआहल्ङ्याब्भ्योदीर्घादिति सोर्लोपोनस्यादितिभावः॥१
॥पथीतिहलन्तसोइति...

॥कोष्ठाबहुलं॥ ... ॥१काव्य

THE ASIATIC SOCIETY OF BOMBAY

॥ ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ॥ ऋतौ यजतीति ऋत्विक् ... ॥२॥ पाठकाल ॥२॥

ल्लोपः पंथाः अपक्षादीर्घः पंथानौ पंथानः पंथानं पंथानौ समपदेह्नोपः समंडस्य पक्षादेष्टेह्नोपः स्या
त् पथः पथा ॥ पथिभ्यामित्यादि एवं मंथाः ऋभुक्षाः ष्णांता षट् उपदेशकाले णांतासंख्यानां ता
वषट्संज्ञास्यात् षड्भ्यो लुक् पंच ५ उपदेशकाले किं ज्ञातानि तदंतग्रहणमात्रस्यात् परमपं
च गौणत्वेतु न प्रियपंचानः पंचभिः पंचभ्यः ५ षट्चतुर्भ्यश्चेतिनुट् नोपधायाः नांतस्योपधायादीर्घः
स्यात् नामि पंचानां परमपंचानां नगौणत्वे ॥ नुट् प्रियपंचां पंचसु एवं सप्तन् नवन् दशन् अ
ष्टनआ विभक्तौ अष्टन आत्वं स्यात् विभक्तौ अनुस्वारसवर्णौ युंक्ते युंक्तः युंक्त
म् युंक्तौ युंक्तः युंजा युग्भ्यामित्यादि असमासेकिं चोःकुः नलोपस्य कवर्गस्या
झलिपदांतेच परतः अष्टाभ्य औश् ऋताका राद्दृशः परयोर्जश्शसोरौश्स्यात् अष्टाभ्य
इतिदीर्घोच्चारणं ज्ञापकमात्वविकल्पस्य अष्टौ ५ परमाष्टौ गौणत्वेतुनात्वं प्रियाष्टा आत्वस्या
ताकादौ श्नं न प्रियाष्टानः आत्वाभावे अष्टाभ्यः ५ अष्टानाम् अष्टासु आत्वाभावे अष्ट ५ अष्टभिः अ
ष्टभ्यः ५ अष्टनाम् परमाष्टानाम् गौणत्वेतु प्रियाष्टाम् अष्टसु गौणत्वेप्यात्वम् ॥ जश्शसोरौशं
त्वेके प्रियाष्टाः प्रियाष्टौ जसि शसि च प्रियाष्टौ प्रियाष्टाः आमि नुट् प्रियाष्टाम् बोधहात्वात् ए
काके वृहद्वाइति संज्ञावः उश्च नर्वे लुत् लुद् लुभौ लुभः लुभम् लुभौ लुभः लुभा लुभ्यामित्यादि ऋ

॥ तदंतविधिरत्रेष्यते ... परमाष्टौ परमाष्टइत्यादि ॥५॥ ... प्रियाष्टा प्रियाष्टाः ... अथ प्रथमा ॥ प्रियाष्टा प्रियाष्टः प्रियाष्टाः ... अनेनवकारस्यलकारः ॥५॥ द्वितीया ॥ प्रियाष्टां प्रियाष्टौ ... ॥ अथ तृतीया ॥ प्रियाष्टा ... ॥ अथ चतुर्थी ॥ प्रियाष्टे ... ॥ अथ सप्तमी ॥ प्रिया...

॥ तृतीयेप्यधिकारे ॥२॥ युक्समाधौ च युज्यते समाधत्ते इति युक् ॥ ४ ॥ सूत्रांतरं विनैव यत्र सिद्धत्वनिपातनम् ॥ १ ॥
॥ अनुस्वारत्यदि परसवर्णः ॥ ६ ॥ ॥ सं युग्दिक्रुञ्चां एतेभ्यः त्रिभ्यः क्विन् विधीयते निपातनैः ... किंचिदर्थ

त्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुंचां च ऋत्विगादयः पंच क्विन्नंता निपात्यंते त्रिभ्यः क्विन् विधीयते अंचेः
सुप्युपपदे क्विन् युजिक्रुंचोः केवलयोः क्रुंचेर्नलोपो नावश्च निपात्यते कृदन्त एते इतः कृदति
ङ् अन्तिङ्जः प्रत्ययः कृत्संज्ञः स्यात् वेरपृक्तस्य अपृक्तस्य वेर्लोपः स्यात् कृत्तद्धितसमासाश्च कृत
द्धिताः समासाश्च प्रातिपदिकसंज्ञास्युः स्वाद्युत्पत्तिः युजेरसमासे युजेः सुमुत्पत्तिरसमासे सु
लोपः क्विन्प्रत्ययस्य कुः क्विन्प्रत्ययो यस्मात् तस्य कवर्गोन्ता देशः स्यात् झलिपदांते च युङ् अनुस्वारसवर्णौ
युंक्तौ युंक्तः युंक्तम् युंक्तौ युजः युजा युग्भ्या मित्यादि असमासे किं चोः कुः चवर्गस्य
कवर्गस्या झलिपदान्ते च सुयुक् सुयुग् सुयुजौ इत्यादि समाधेरर्थस्य युजेनात्वम् युज
कं समाधिमानित्यर्थः संयोगांतस्यलोपः खन् खञ्जौ इत्यादि व्रश्चभ्रस्जेति षत्वम् जश्त्व
चर्त्वे राट् राड् राजौ राजः राजम् राजौ राजः राज्ञा राड्भ्या मित्यादि एवं विभ्राट् देवेट् वि
श्वसृट् परिमृट् परिव्राडेः षः पदांते परिपूर्वपदेस्मति व्राजेर्धातोः षः स्यात् पदांते एवं विप्राड् परि
व्राड् सर्वसंन्यस्य व्रजतीति परिव्राट् विश्वस्य वसुराटोः विश्वशब्दस्य दीर्घोन्तादेशः स्यात् वसौ राट् श
ब्दे च परे विश्वावसुः विश्वाराट् ५ विश्वराजौ विश्वराजः स्कोः संयोगाद्योरन्ते च पदान्ते च संयोगस्य
दाद्योः सकारककारयोर्लोपः स्यात् झलिपरे स्टट् स्टड् रुत्वान्तं दश्मीति सस्यादेशः सुत्वं स्टञ्जौ स्टञ्जः

॥ विश्वस्य वसुराटोः ... ॥ ॥ ऋत्विग्दधृक् ... ॥६॥ ॥ स्कोः संयोगाद्योः ... ॥२॥
॥ विश्वामित्रः ॥२॥ विश्वान् राजते विश्वाराट् ॥२॥ ॥ झलिचपरतः झलिपरेषः संयोग... सकारककारयोर्लोपः स्यादित्यर्थः ...

THE ASIATIC SOCIETY OF BOMBAY

॥ कृतो यजति कृञ्त्वा यजति कृञ्प्रयुक्तो वा यजति इति कैयटः ॥ १ ॥ कर्त्ता च सा गणपोः … मिति सूत्रे णकि ॥ १ ॥ थय तदेतस्त्यथवा: थेत वारित्या

इत्यादि क्विन्नतवाक्यस्यम् करिनक् य करिज्ञौ इत्यादि रात्सस्येति नियमान्नसंयो न्नलोपः नोंक्तः क्रु
र्क्‌ उर्य्यौ क्रुञ्जौ क्रुञ्जः इत्यादि अवयाः अवयाजौ अवयाजः हेअवयाः हेअवयः अवयाजं
अवयाजौ अवयोस्या मित्यादि त्यदाद्यत्त्वे पररूपत्वम् तदोः सः सावनंत्ययोः त्यदादीनां तकारदकार
रयोरनंत्ययोः सः स्यात्सौ परे स्यः त्यौ त्ये इत्यादि बांदिकाविति के सः तौ ते इत्यादि सर्वविति
परमसः परमतौ परमते संज्ञायां गौणत्वेचा नसर्वे सर्वे च त्यद् त्यदौ त्यदः अतित्यद् अ
तित्यदौ पत्‌ यद्‌ एषः एतौ एते इत्यादि अ आदेशे द्वितीया टौस्त्वेनः एनम् एनौ एता
न् एनेन एनयोः ङे प्रथमयोरम् युष्मद् अस्मदोः परस्य ङे इत्यस्य प्रथमा द्वितीययोश्च
अमादेशः स्यात् त्वाहौ सौ युष्मदस्मदोर्मपर्य्यं यन्तस्य त्व मा त्वा हा नादेशोस्तः सौ परे शे
षेलोपः आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्म दस्मदोरंत्यस्य लोपः स्यात् अतो गुणे अमि पू
र्वः त्वम् अहम् शेषेलोपे अलिंगत्वा द्विलोपो टापून अहं स्त्री परमत्वम् अतित्वम् परमाह
म् अत्यहम् युवावौ द्विवचने द्विवचनस्येत्यर्थग्रहणं द्व्यर्थवाचिनो युष्मदस्मदोर्मपर्यंतस्य युव
वौ स्तः प्रथमायाश्च द्विवचने भाषायां प्रथमा द्विवचने परे युष्मदस्मदोराकारान्तादेशः स्यात् भाषा
याम् युवाम् आवाम् मपर्यंतस्य किं साकच्कस्य मा भूत् युवकाम् यूयवयौ जसि युष्मदस्म

॥ आज्ञादेशे अतो गुणे च मत्विशेषे लोपइति अत्वदलोपे चकृते त्व अ स् अह अ स् इति स्थिते अतो अमि पूर्वः अम् अहम् ॥ ४ मतान्तरेणात्वं अति अस्या शेषे लोपो न चेति तस्मा दंत
(आतो लोपइति परूपं स्यात् ॥ त्व० ४

॥ नक्तंहि विधिरन्ते अत्र तेन प्राधान्ये युरक्व अ अमत्व स्यातामू ॥ ५

॥ मपर्यंतइति युष्मद्र नियावत्‌ युष्माकद स्माकद इत्यतावन्म: मयुक्तं यस्य युवावा द्विरादेशौ मा भूत्‌ मा ऽति कांता स्यादि म पर्यंतस्याधिकारः ॥ ६

॥ द्वयोर्वचनं द्विवच नं इत्यर्थपरत्वान्निर्देशः ॥ ३

विनाकस्य ॥ २

…स्य दूत्र शुद्धे … मृत्‌ नानाद्वयोः … मावात्वे ॥

॥ द्विजमा … प्रथमा … द्विवचने … लोपः …

॥ भाषायां किं युवं वस्त्राणि पाका वा भार्ये इति वेदे ॥ २

२०

॥ एकस्य वचनं एकवचनं इत्यर्थपरत्वान्निर्देशः ॥ २ ॥ तस्याश्च मोन: पुंसि इत्यतेने नसिके किमकारो तादेशः ॥ ३ ॥ डे प्रथमयोरमु इत्यस्य पवादः ॥ ४ ॥ आदेः परस्येति
शस्य कारनः संयोगान्तलोपइति सकारस्य लोपः ॥ ४ ॥

दोर्मपर्यन्तस्य यूयवयौ स्तौ जसि शेषेलोपः यूयम् वयम् परमयूयम् अतियूयम् परमवयम् अ
तिवयम् त्वमावेकवचने एकवचन इत्यर्थः निर्देशः एकार्थवाचिनो युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तः
द्वितीयायांच द्वितीयायां परतो युष्मदस्मदोराकारान्तादेशः त्वाम् माम् युवाम् आवाम् शसोन युं
ष्मदस्मद्भ्यां परस्य शसो नकारः स्यात् शमो पवादः आदेः परस्य संयोगान्तस्य लोपः युष्मान् अस्मान्
योचि युष्मदस्मदोरनकारान्तादेशः स्यात् अना दृशे अजादौ परे त्वया मया युष्मदस्मदोरनादे
शे युष्मदस्मदोरनकारान्तादेशः स्यात् अनादेशे हलादौ परे युवाभ्याम् आवाभ्याम् युष्मा
भिः अस्माभिः तुभ्यमह्यौ ङयि युष्मदस्म दोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि अमा
देशः शेषेलोपः तुभ्यम् मह्यम् परम तुभ्य म् परममह्यम् अतिमह्यम् युवाभ्याम् आ
वाभ्याम् भ्यसोभ्यम् युष्मदस्मद्भ्यां परस्य भ्यसोभ्यम् स्यात् शेषेलोपः अंगात्यलोपप्रवृत्ते पु
नर्नागाश्रयकार्यम् तेन एत्वं न स्यात् अभ्यमित्यादेशो वा युष्मभ्यम् अस्मभ्यम् एकवचनस्य च
आस्यां पंचम्यकवचनस्य अत् इत्यादेशः स्यात् त्वत् मत् युवाभ्याम् आवाभ्याम् पंचम्या अत् आ
भ्यां पंचम्याभ्यसोत् स्यात् युष्मत् अस्मत् तवममौ ङसि युष्मदस्मदोर्मपर्यन्तस्य तवममौ स्तो ङसि
युष्मदस्मद्भ्यां ङसोम् आभ्यां ङसः स्यात् अश् आदेशः स्यात् शादि त् तव मम परमतव परममम

॥ स्यादेशो वा शेष इदं वचनं इति यस्ता वोक्तं तद्भूमत् शेषेलोप इत्यस्य ऽनादेशाविभक्तौ च प्रवृत्तेः … स्यादेशः कथं न … इत्याशङ्क्य … शेषः … लोपो … आदेशः
मनविकारं यातीत्यर्थः ॥ २

॥ तवां इति स्विा त्यां युष्मद इत्यनेन प्र स प्तो ॥ १

ममस्यमानेऽइत्यादिनाब्धेः श्लोकाः॥ ममस्यमाने ममामामा वयवद्धेतेयुष्मदस्मदी के कश्चवश्चिनीद्वि मकद्वेवाचदतश्चैत। ममामस्यार्थाद्वित्रिष्वं मोन्यसंख्या श्चेत् युष्मद
स्मदर्थगत संख्या विरुद्ध संख्या युक्तं भेतद्यथा क्रामप्यायुवाविो च भिमवतः एतदुक्तं भवति यत्र ममाने युष्मदस्मदी द्विवत्रित्रिष्वमर्थं प्रतिपादयतः ममौमा
मा तु एकवचनं न कुवचनं वा भवति तदापि युवावौ भवतः; यथा युवामतिक्रान्तं अतियुवाम् युवामतिक्रान्तान् अतियुवानिति वा अत्यय ग्रहणेन त्वनस्या

अतितव अतिमम युवयोः आवयोः आमिसुटिक्विते मामाकम् आत्स्यांसुट्सहितस्यामआ
कमूस्यात् युष्माकम् अस्माकम् त्वयि मयि युवयोः आवयोः आवम् युष्मासु अस्मासु १ सु
समस्यमानाद्येकत्व वाचिनी युष्मदस्मदी ममासाद्यमिसंख्याश्च त्वाद्युवावावमावपि २ सु
ङस्डेङसुपरतः आदेशाः स्फः सदते त्वाहौ यूयवयौ तुभ्यमह्यौ तवममावित्ति ३ एतेपरत्वाद्
धन्ते युवावौ विषयेस्वात्के त्वमावपिच बाधान्ते (विवक्षुर् युष्मदः) पूर्वविप्रतिषेधतः ३ द्विकसंख्यः समासार्
थो बकार्थे युष्मदस्मदी तयोरद्विकतार्थत्वा (मादेयदुणश्वर्धैर दणी कारविवक्षण) न्नयुवावौ त्वमोनंच ४ त्वांमांवा अतिक्र
न्त इति विग्रहे अतित्वम् अत्यहम् अ (मिति अयुष्मोस्मदोरात्मश्रुम दस्माद्योरकार्थान्तन्तनक) तित्वाम् अतिमाम् अतियूयम् अतिव
यम् अतित्वाम् २ अतिमाम् २ अतित्वान् अ (त्या न्तुमारणे दादरणन्या) तिमान् अतित्वया अतिमया अतित्वाभ्या
म् अतिमाभ्याम् अतित्वाभिः अतिमाभिः आ.. तुभ्यम् अतिमह्यम् भ्यामिष्वायत् अतिभ्य
स्यम् अतिमभ्यम् अतित्वत् अतिमत् भ्यामिष्वायत् भ्यसौऽभ्यमितत् अतितव अतिमम अतित्व
योः अतिमयोः अतित्वाकम् अतिमाकम् गोणतायाम समर्वनामसेनसुटस्त्वात् सामआक
मित्यस्याप्रवृत्तेर्यो वीति यकार इति केचित् अतित्वयाम् अतिमयाम् अतित्वयि अतिमयि
त्वमिष्वायत् अतित्वासु अतिमासु युवांआवांवा अतिक्रान्तः इत्यत्र सुजसेटस्सुष्वायत् अ
विषति बंधेपरमित्यत्रेपरम शाश्वसे श्वनाचिद्यादित्यर्थः एवंमर्थग्रहणेन प्रयोजनयुक्तापाणिनापिकग्रहणेन्यतिकेरेसुस्त्वेनदोषमांहादिकसंख्याऽइति यदायुष्मदस्मदी बद्धोर्थे बकु
वचित्रिषार्थवाचीनी ममामार्थस्तुद्विसंख्या एकसंख्या वातदाद्विवचनपरत्वेपियुवावौ न स्तः एकवचनपरत्वेपियमौ नस्तः कुतो नस्तः इत्यत्रहेतुमाह तयोरिति तयोर्युष्मदस्म
दोर्द्विकैकवाचित्वाभावात् अद्वार्थत्वात् युवावौ न अनेकार्थत्वाद् त्वमौ न अतोऽर्थग्रहणं भी ष्यते पाणिनापिकस्यत्वग्रहणस्याद्विविधसंग्रहस्तिसावः तदुक्तं कात्यायनेन

संख्ये पि युष्मदस्मदोर्मपः पर्वेद्वकात आदेशाऽइत्याह त्वाहाविन्यादि त्वाहौ मायूयवयौ जसिजुम्यमह्यौ ङयितवममौ ङसीति क्रमेण द्वय; नत्वर्थमात्रापेक्षयेमांतत्रा ग्रातश्च त्वावादिभिरतेत्वाध्यु नांनत्वेषां विधिस्वयर्थं मकारार्थत्यासमास्व काश्रयाद्विल्यात्त्रा क्या विपर्ययमाहएते ऽन्तिपत्ते शाहादयः स्वकेविषयेसुजसङे ऊमसु परतः युवावौ कमस्मूतौ बाधते त त्रहेतुः परत्वात् दिति विप्रतिषेधेपरंकार्यमिति वचनात् इत्यर्थः य द्युक्तंअन्तरंगात्युवाद यऽति तत्र विलग्नश्र याद्वन बहिरंगस्य स्म तुल्यत्वात्मत्वेवेबाध्येनांन युवाव्वौ त्वमौ ज्ञते स्योविपरीतौकसंवाध्येते इत्यत्य आहा परा वप्यतोपूर्वैरप्यतेर्बाध्य ते कुतऽइत्याह पूर्वेवि

द्विवचनपरत्वाभावात् अतो द्विवचन इत्यर्थः निर्देशाश्चाभ्य इत्यर्थः तथा युष्मदस्मदी एकार्थ वित्रिषु मर्थप्रति पादयतः ममामातु द्वित्रिष्वुसंख्यावच्छा नुद्विवचनंबहुवच नं वात्पद्येन तदापि त्व मौ भवत इत्यर्थ उदा हणमाश्रीयते। त्वां मा तिक्रान्तोवा अति त्वा त्वामतिक्रान्तमिति एकवचन इति प्रत्य यग्रहणं ज्ञानस्यात् द्विवचन बहुवच नपरत्वात् यद्येवं सुजस्ङे ङस्सु आ युष्मदस्मदौ द्विधा त्वेयुवावौ एकार्थ वित्वाभ्याम् तां अ र्थग्रहणाद्वित्याश्रांग कपर्दे इरति सुजसि २१ तिसु नमड ङ उ सु एतेषु च र्ध्येविहिता आदे शा ग्रोमादेवसर्व।

अमु अहं अतियुवाम् अत्यावाम् अतियुवान् अत्यावान् अतियुवया अत्यावया भ्यामि अतियुवा
भ्याम् अत्यावाभ्याम् अतियुवाभिः अत्यावाभिः भ्यसि अतियुवभ्यम् अत्यावभ्यम् ङसिभ्यसोः अ
तियुवत् अत्यावत् ङसि अतियुवयोः २ अत्यावयोः २ अतियुवाकम् अत्यावाकम् अतियुवया
म् अत्यावयाम् इतिकेचित् अतियुवयि अत्यावयि अतियुवासु अत्यावासु युष्मानस्मान्वा अति
क्रान्त इत्यत्र अअम् ऊङ्ग अतियुष्मान् अत्यस्मा न् अतियुष्मान् अत्यस्मान् अतियुष्मया अत्य
स्मया भ्यामि अतियुष्माभ्याम् अत्यस्माभ्याम्॥ अतियुष्माभिः भ्यसि अतियुष्मभ्यम् अत्य
स्मभ्यम् ङसिभ्यसोः अतियुष्मत् अत्यस्म त् २ ङसि अतियुष्मयोः अत्यस्मयोः २
अतियुष्माकम् अत्यस्माकम् अतियुष्मया म् अत्यस्मयाम् इतिकेचित् अतियुष्मयि
अत्यस्मयि अतियुष्मासु अत्यस्मासु शेषं प्राग् वत्॥ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयो
र्वान्नावौ पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिद्विवचनान्तयोः क्रमात् वांनौ इत्यादेशौ स्तः
बहुवचनस्य वस्नसौ एकविधयोरनयोः षष्ठ्यादिबहुवचनान्तयोः वस्नस् इतोतौ स्तः तेम
यावेकवचनस्य तादृशयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोः तेमे इत्येतौ स्तः त्वामौ द्वितीयायाः ता
दृग्विधयोर्द्वितीयैकवचनान्तयोः त्वामा इत्येतौ स्तः श्रीशस्त्वावतुमापीह दत्तात्तेमेपिशर्मसः स्वामी।

त्वमपिहरिः पातुत्वामपिनोविष्णुः १ सुखंवांनौद्वयोर्ज्ञः पतिर्वामपिनौहरिः सोव्यात्क्लेनःशिवंवोनो
द्यात्केशवोस्तुवःसनः २ पदात्परयोः किं वाक्यादौ मास्तु वांपातु मांपातु आपादादौ किं युष्मान्
रक्षतु गोविंदो अस्मान् कृष्णः महाविष्णुस्तद्गुहणादि किंलोपेनित्यस्मदः युवयोः पुत्रा युष्मत्पुत्रः प
तेनप्रत्यास्त्यादेशा अन्यत्रादेशा वा न कर्तव्याः अत्रादेशो तु नित्यंस्मृदः धातानततत्वापत्यं तस्मैतद्य
स्तनमः नचवाह्यहैवयुक्ते वादिपंचकारयोगे नै तेआदेशाःस्मृः आवयोर्युवयोश्च श्रीहरिर्मामि
वरक्षतु साक्षाद्योगे असंनिषेधः युक्तयुक्तेतुन निषेधतः हरिश्च मेस्वामी पत्रपार्श्वानालोच्य।
न अन्वाकुष्टज्ञानार्थेकोतुस्तियोगेनित्यस्मदः। वनमाश्वांप्रतीक्षते युक्तयुक्तेपिनिषेधः स
कृत्स्नस्मपंश्यायति आलोचनंतु सकार्यंपत्रं तिषकुष्टा मत्स्वीयाः प्रथमाया विशाषा विद्य
मानपूर्वास्तुप्रथमांतात्परयोरन्वादेशोपिप्याते आदेशा। स्मृः सकृत्स्नमयहितनहरिस्त्वा ज्ञायतेसमा विशे
ष्यपूर्वसंबोधनेतरस्मृर्द्वच संबोधनंहिप्रत्यस्मात्संबोधनांतान्नेति इतिकेचित् देवास्मान्पाहिरक्ष्य
विष्णो स्मानरक्ष सर्वदा विशेषपूर्वात्तु हरिकृपालोमांपाहि ॥ असंबोधनपूर्वात्तु सर्वदारक्षदेवनः
च॥ सुपाद्सुपाद् सुपादौ सुपादः पादःपत् पाच्छब्दस्य भस्य पदादेशः स्यात् सुपदः सुपदा सुपद्
भ्या मित्यादि अग्निमत् अग्निमथौ अग्निमथः अग्निमथा मित्यादि प्रांच् इतिस्थिते किंनिरूते अ

५५

निदितां हलउपधायाः क्ङिति हलंतानामनिदितां उपधाया नस्य लोपः स्यात् क्ङितिक्ङिति उगिदचामि
तिनुम् संयोगांतस्य लोपः नकारस्य कुत्वेन ङकारः प्राङ् अनुस्वारसवर्णौ प्राञ्चौ प्राञ्चः प्राञ्चं प्रा
ञ्चौ अचः लुप्तनकारस्यांचतेर्भस्याकारस्य लोपः स्यात् अचो लुप्तनकारांचतोपूर्वस्याणः स्यान्दी
र्घः स्यात् प्राचः प्राचा प्राग्भ्या मित्यादि प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः प्रत्यंचं प्रत्यंचौ प्रतीचः प्रतीचा प्र
त्यग्भ्या मित्यादि उगिदचामिति नुम् संयोगांतस्य लोपः अमुमुअङ् इतिस्थिते यणादेशः अमुमु
यङ् अमुमुयञ्चौ अमुमुयञ्चः आमादौ नुम् तावास्यादिति द्विधाप्रसंधिः अमुमुयचः अ
मुमुयच्या अदसंदमुयङ् अमुयङ् अदद्र्यङ् ङ् अदद्र्यङ् अदद्र्यञ्चौ अदद्र्यञ्चः आमादाववत्ति अ
दद्र्यत् अदश्चात्परस्यास्यांचतेरस्यइत्स्यात् अ दीचः अदीचा अदद्र्यग्भ्यां सम्यः समि अप्रत्ययां
तेवतौ परे समः सम्यादेशः स्यात् सम्यङ् सम्यञ्चौ समीचः समीचा सम्यग्भ्यां तिरस् अंच् इतिस्थि
ते तिरस्तिर्यलोपे अलुप्ताकारेंचतौ परे तिरसस्तिर्यादेशः स्यात् तिर्यङ् तिर्यञ्चौ तिर्यञ्चः अका
रलोपः स्मृर्वं तिरश्च तिरश्चा तिर्यग्भ्या मित्यादि प्रांच् इतिस्थिते नांचेःपूजायां पूजार्थस्यांचतेरुप
धाया नस्य लोपो न स्यात् अलुप्तनकारात्मन्नुम् प्राङ् प्रांचौ प्रांचः नलोपाभावाच्चस्यापि लो
पः प्रांचः प्रांचा संयोगांतस्य लोपः कुत्वेन ङकारः प्राङ्भ्यां प्राङ्क्षु कुंचः कुङ् इतिकुंच प्राङ् कुङ्

कुचधीजो गेहः

~ अनुस्वारययिपरसवर्णः ~

एवं प्रत्यङादयः क्रुङ् क्रुञ्चौ क्रुञ्चः क्रुञ्चं क्रुञ्चौ क्रुञ्चा क्रुङ्भ्यामित्यादि चोक्तः पयोमुक्
पयोमुग् पयोमुचौ पयोमुचः झलां जशोन्तेति चस्य कः संयोगेति सलोपः डस्यवर्ज्जे सुहृट् सु
हृड् सुहृदौ सुहृदः इत्यादि उगिदचाम् सांतमहतः संयोगस्येति दीर्घः महान् महान्तौ महान्तः
महान्तं महान्तौ महतः महता महद्भ्यामित्यादि अत्वसन्तस्य चाधातोरिति दीर्घः भवान् भवन्तौ भवन्तः नवर्ह ~
भवन्तं भवन्तौ भवतः भवता भवद्भ्यामित्यादि शेषं महद्वत् अत्वन्तत्वाद्दीर्घः धीमान् हे धी
मन् शेषं महद्वत् अत्र भवत् तत्र भवच्छब्दौ पूज्यार्थौ धीमद्वत् अत्रभवान् अत्रभव
न्तौ अत्रभवन्तः लक्ष्यार्थाः तत्रभवन्तः प न्तं तत्रभवान् तत्रभवन्तौ तत्रभवन्तः
विनापि लघ्वङ्गवदिति सिद्धं अवस्थाकारा वा हेलोः हेलसन् हेलसन्तौ हेलसमन्
शेषं धीमद्वत् ग्रसे अन्यत्र अन्यप्रकरणाया षष्ठिते तेऽन्ते समुदिते अभ्यस्तसंज्ञेभ्यः
नाभ्यस्ताच्छतुः अभ्यस्तात्परस्य शतुर्नुम् न स्यात् ददत् ददतौ ददतः इत्यादि जक्षित्यादयः ष
ट् षड्धातवोऽन्ये जक्षितिश्च सप्तमः एते अभ्यस्तसंज्ञास्युः जक्षत् जक्षतौ जक्षतः एवं जाग्र
त् दरिद्रत् शकाशात् दीध्यत् वेव्यत् धर्मगुप् धर्मगुब् धर्मगुपौ धर्मगुपः धर्मगुभ्याः त्यद
दिषु दृशोऽनालोचने कञ् त्यदादिषूपपदेषु अनालोचनार्थात् दृशो धातोः कञ् स्यात् चात् क्वि २३

न् क्विन्नन्तत्वात् कत्वं तादृक् तादृग् तादृशौ तादृशः एवं यादृग् समानान्ययोश्चेति वक्तव्यं इति
क्विन् सदृक् सदृग् सदृशौ सदृशः अन्यादृक् अन्यादृशौ व्रश्चेति षत्वम् अस्य विट् विड् वि
शौ विशः विशा विड्भ्यामित्यादि नशेर्वा नशेः कवर्गोन्तादेशो वा स्यात् पदान्ते नक् नग् नट्
नड् नशौ नशः नड्भ्यामित्यादि नक्षु नट्सु अतेनाहादिकात् ङस् पुरोडाः पुरोडाशौ पुरोडा
शः पुरोडाः पुरोडाः पुरोडोभ्यां स्पृशोऽनुदके क्विन् अ नुदके सुप्युपदे क्विन् स्यात् घृतस्पृक् घृतस्पृशौ
घृतस्पृशः क्विन्प्रत्ययो यस्मात् विहितः तस्याप्य पि कुत्वं अपि पदान्तस्य कुत्वं स्यात् स्पृक् स्पृग्
स्पृशौ स्पृशः स्पृग्भ्यामित्यादि दधृक् दधृग् द धृग्भ्यामित्यादि रत्नमुट् रत्नमुड् रत्नमुड्भ्या
मित्यादि षड्भ्यो लुक् षट् षड् षड्भिः षण्णां षट्सु तदन्तग्रहणात् परमषट् परमषण्णां
गौणत्वे तु प्रियषषः प्रियषषां रूढप्रतिषेधस्यापि कत्वाभ्यासे इति भवम् वोरुपधाया दीर्घ ४६+
इकः रेफवकारान्तधातोरुपधाया इको दीर्घः स्यात् पदान्ते पिपठीः पिपठिषौ पिपठीर्भ्यां वा शरि
ति वा विसर्जनीयः सत्वपक्षे समस्पर्शे अस्य विसर्जनीयस्य शर्परेऽपि पठिष्यस्त्वां
परस्य सस्य मूर्द्धन्यः स्यात् पिपठीष्षु विसर्जनीयपक्षे पिपठीःषु रात्सस्येति सलोपः चिकीः चि
कीर्षौ चिकीर्भ्यां चिकीर्षु दोः दोषौ दोषः दोषं दोषौ पद्दन्नोमासेति दोषन्नादेशः दोषः दो

~षडिति षष्णाः शेष
कत्वं तत्र तत्र
मोः मतो ता षडिति
षट्संज्ञायां षड्भ्यो लु
गिति तत्र मोः लुक्
वर्णा मिति षट् चतुर्भ्य
इति तदन्तग्रहणात्
मिकाइति वडनामिक
तदन्तग्रहणात् ति
लक्ष्यो लुगित्यत्र षट्
चतुर्भ्य इत्यत्र च तदन्त
ग्रहणात् परमषट् इ
त्यत्र लुङ् स्यादिति यदि
परमा षष्ठे षट् चेति गौ
णत्वे त्वित्यादि प्रिया
षट् येषां ते प्रियष
ट् इत्यत्र गौणत्वे तस्मा
न्नो लुक् प्रियषष्य
मित्यत्रानुवृत्तस्य च ति
गौणत्वे तयोर निषे
धात् ~६ अथः ~

॥घोड–

सः दोषा दोला दोस्यां दोषुन्या मित्यादि असत्वर्वे स्कोः संयोगेति कलोपंप्राप्ति कत्वस्यासिद्धत्वात्
निविट् निविड् निविड्डौ निविड्डः निविड्भ्यां निविड्सु स्कोरितिकलोपः तट् तड् तड्डौ तड्डः
तड्भ्यां तट्सु संयोगांतस्यलोपः पिपक् पिपग् पिपक्षौ पिपक्षः पिपग्भ्यां पिपक्षु एवं गोरट्
गोरक्षौ गोरक्षः रक्षते संयोगांतलोपइत्येके स्कोरितिकलोपंप्राप्तिकत्वस्यासिद्धत्वात् संयोगां
तस्यलोपः गोरग् स्कोरितिकलोपंप्रतिकृत्वस्या सिद्धित्वात् संयोगांतस्यलोपः पिनपग् पिन्प
क्षौ पिपक्षः पिपग्भ्याम् पिनपक्षु एवं सुपक्षादी र्घः सुपीः सुपीसौ सुपीर्भ्यां सुपीषु सुपीस्सु
विद्वान् हेविद्वन् विद्वांसौ विद्वांसः विद्वांः सं विद्वांसौ वसोः संप्रसारणं वस्वंतस्य
संप्रसारणं स्यात् पूर्वरूपत्वं षत्वं विदुषः विदु। षा वसुअसु इति दत्वम् विद्वद्भ्या मित्यादि
पश्विवान् पश्विवांसौ वस्वंत्वादिड्त्वात्वः पेत्तुष पेत्तुषा पश्विवद्भ्या मित्यादि जगन्वान् जग
न्वांसौ जगन्वांसः वस्वंत्वेतति सिद्धस्यान स्यमगंगमहनजनखोरनघसांलोपः क्लित्यडि एषामु
पधायाः लोपः स्यात् ऽजादौ क्लिति नत्वडि जग्मुषः जगन्वद्भ्यां जगन्वद्भिः एवं जघन्वान् सांतम
हतः इति महच्छब्दस्य सांतस्य यात्संतान्नातोर्नदीर्घः सुहिन् सुहिंसौ सुहिन्भ्यां ध्वत् ध्वसौ ध्वसः ध्व
सा ध्वद्भ्यां एवं स्रत् उक्कशाः उक्कशासौ उक्कशासा मित्यादि पुंसः सुट्ट् पुंसौ समस्य असुङा ५४

॥विद्वस्तोने
लटः शत्रादे
शः कर्त्तरि
शप् आदि
त्वन्तात्स्पः
शप्लुक् वि
दे आउवसुः
उकारइगि
कार्याः वृप
वत्सपवि
द्धम्॥

देशः स्यात् उशनितौ उमान् उमांसौ उमांसः शसादौ संयोगांतस्यलोपे सौ उत्वारे व्याप्त्यांतस्य
तिएरसवर्णो उमूत्या मित्यादि ऋउशन समित्यनङ् उशना उशनसौ उशनसः संबुद्धौवानङ्
वाच्यः नलोपश्च हेउशनः हेउशनन् हेउशन उशनोभ्या मित्यादि अनेहाः अनेहः अनेह
सौ एवं पुरुदंशाः वेधाः वेधसौ हेवेधः इत्यादि अधातोरित्यकेनदीर्घः सुवः सुवसौ सुव
सः सुवोभ्या मित्यादि सुवस्सु सुवःसु अद सअ सुलोपश्च अदसअकारांतादेशः स्यात्
सोपरे सुलोपश्च तदोः समाविदिदस्यासः। असौ अवप्रतिषेधः साकच्कवाहावकव्यं
माऽवंत्व यहोमासाव तदा मात्परस्य ष्वं असुकौ असुकः त्यादाद्यवं पररूप
त्वं अदसोर्मेदादुदोमः अदसोऽसेतस्यद्या। त्परस्यउवर्णः दसात्वमः स्यात् स्थानेंतरतम
इति कत्वस्य ऊत्वं दीर्घस्य दीर्घऊकारः अमू जसः शीत्वविः आद्गुणः एतईक्कउवचने अ
दसो दात्परसौ तईत्वमात् दस्यमः अकार्यो कौ अमी पूर्वत्रासिद्धन्यायेन विसक्तिकार्यं प्राक्
पश्चादुत्वमत्वे अमुं अमू अमून् उत्वमत्वेकृते घिसंज्ञायां नात्वाव अमुनानात्वाविकर्त्तव्ये मत्वेच
मति कृत्वोनासिद्धः स्यात् अमुना अमूभ्यां नेदमदसोरकोः अमीभिः अमुष्मै अमूभ्यां अमीभ्यः अ
मुष्मात् अमूभ्यां अमीभ्यः अमुष्य अमुयोः अमीषां अमुष्मिन् अमुयोः अमीषु इतिसांताः पुंलिं

॥एवंत्रैनपदा
यैवेतनैः॥

॥उद्दत्॥

॥ऊलाहौव
ऊवचनेति
एकारः एवी
वऊवे॥

॥इस्यदः॥२

॥दिवउभितद्ध ऽिवतः॥२

गाः नद्योः नद्योरिस्यश्चः स्यात् जलिपदांतेव उपानत् उपानहू उपानहौ उपानह्या मित्यादि क्वि
न्नंतत्वात् कत्वं उष्णिक् उष्णिग् उष्णिहौ उष्णिहा मित्यादि दिवऊत् द्यौः दिवौ दिवः द्यां दिवं
दिवऊत् उत्वर्णेपदस्वरे दिवऊदितिकेचित् कृणूनु अन्यत्रदिवौ द्यौः गीः गिरौ वक्रस्वतत्वादेश
स्वस्याद्विवान्नडीपू चतस्रः २ चतसृभिः चतसृभ्यः चतसृणां चतसृषु किमः कादेशः टापू का
के काः इत्यादिसर्वावत् यन्मो इदमोदस्य यः स्यात् सौपरे इयं इदमोमः त्यदाद्यत्वं टापू
इमेतिमः इमे इमाः इमां इमे इमाः अन द्विशः अनया हलिलोपः आभ्याम् आभि
: अस्यै आभ्यां आभ्यः अस्याः आभ्याम् आभ्यः अस्याः अनयोः आसां अस्यां अ
नयोः आसु अन्वादेशात् एनां एने एनाः एनया एनयोः स्रक् स्रजौ स्रजां त्यदाद्यत्वं
टाप्स्यात् स्या त्ये त्याः इत्यादि सर्वावत् एवंत दृ एतद् यद् वाक् वाचः वाचां अप्शब्दो नित्य
बहुवचनांतः अपन्निति दीर्घः आपः अपः अद्भिः अपस्तकारः स्यात् भादौ प्रत्यये परे अ
द्भिः अद्भ्यः अपां अप्सु दिक् दिशौ दिशः दिशां एवं दृक् दृक् दृशौ दृशो श्व वक्तव्यमिति क्विन्
त्विट् त्विड् त्विषौ त्विषः त्विड्भ्यामित्यादि सजूः सजुषौ सजूर्भ्यामित्यादि एवं आशीः आशिषौ आ
शिषः असौ त्यदाद्यत्वं टापू औत्वविधि उत्वमत्वे अमू अमूः अमुया अमूभ्यां अमूभिः अमूष्यै २५

॥किमस्य इति स्थिते सो लुकि कृते न लुमतांगस्येति प्रत्ययलक्षणनिषेधान् किमः कः इति वित्त को परतो विधीयमानः कादेशो न लवतात्पर्यः के कानीति कादेशो कृते तानवत्प्रक्रिया॥४

अमूभ्यां अमूभ्यः अमुष्याः अमूभ्यां अमूभ्यः अमुष्याः अमुयोः अमूषां अमुष्यां अमुयोः अमूषु
इति हलंता स्त्रीलिंगाः स्वमोर्लुक् दत्वं स्वनडुत् स्वनडुद् स्वनडुही चतुरनडुहोरित्याम् स्वन
डुांहि पुनस्तद्वत् शेषं पुंवत् वाः वारी अजलंतत्वान्नुम् वारि चत्वारि नलुमतेति कादेशोन
किं के कानि इदं इमे इमानि अन्वादेशे अमोलुकि एनदिति वा एनत् एने एनानि शेषं पुंव
त् ब्रह्मसंबुद्धौ वानपुंसकनलोपो वक्तव्यः हे ब्रह्म हे ब्रह्मन् ब्रह्मणी ब्रह्माणि अहन् अह
न्नित्यसारुः स्यात् पदांते रुत्वस्यासिद्धत्वेन न लोपाभि अह्नानलोपे प्रतिषेधो वक्तव्यः अह
: विभाषाङिश्योः अह्नी अहनी अहानि अहः अहोभ्यां दंडि दंडिनी दंडीनि स्रग्वि
णं ग्रो एषामंगानामुपधायाः दीर्घः स्यात् नं शौपरे दंडिनी बहुवृत्रहाणि बहुपूषाणि
असृजः पदांते कत्वं स्रजः क्विन्विधानात् वि श्वसृजादौ कत्वं प्रतिषेधोयं असृक् असृग्
असृजी असृंजि पदन्निति असन्नादेशः असन् असानि असृजा अस्ना असृजां असनां अ
र्क् ऊर्ग् ऊर्जी ऊर्जि नुमन्वेति केचित् ऊर्ज्जि ऊर्ज्जि बहु ऊर्जि नुमप्रतिषेधः बहु ऊर्जि कुला
नि अंत्याल्पूर्वं नुम् इहांत्य केवलं ऊर्ज्जि त्यत् त्ये त्यानि तत् ते तानि यद् एतद् अन्वादेशे तु
नपुंसके वचने एनदितिवाच्यम् एनत् गवाक् समंज्याः अकारलोपः गोची गवांचि

॥गवाक् दशरूपाणि लिंगविशेषाणि तेदतः अ
संधा १ अवजर पक्षरूपे २ नवाधिकशतं मतं
संबोधन युक्ते प्रेषमे कवचनेस्मो कतः अष्टादशाष्ट॥

डाक्टर भाऊदाजी स्मारकम्
DR. BHAU DAJI MEMORIAL

तिर्यग् तिर्यग् तिरश्ची तिर्यंचि एवं यकृत् यकृती यकृंति पद्यन्निति वा यकन् यकानि यकृता य
क्ना यकृद्भ्यां शकृत् शकृती शकृंति शकानि शकृता शक्ना शकृद्भ्यां शकभ्यां ददत् ददती एवं
जक्षत् जाग्रदादयः ऽदत् आच्छीनद्योर्नुम् अवर्णान्तात्परस्य शतुर्नुम् वा स्यात् शीनद्योः परयोः
तुदंती तुदती तुदंति भात् भांती भाती पचत् शप्श्यनोर्नित्यं शप्श्यनोः परस्य शतुर्नुम् स्यात् शीन
द्योः परयोः पचंती पचंति दीव्यत् दीव्यंती ॥ दीव्यंति स्वप् स्वपी अप्तृन्निति पूर्वः स्वांपि
स्वपा स्वब्भ्यां स्वब्भिः रुद्रं धनुः धनुषी सांतमं इत्युति दीर्घः उमुविसर्जनीयेति षत्वं धनूं
षि धनुषा धनुर्भ्यां एवं हविः पयः पयसी प यांसि पयसा पयोभ्यां पयोभिरित्यादि
अदः विभक्तिकार्ये अमू अमूनि शेषं पुंवत् ॥ इति हलंताः नपुंसकलिंगाः स्वरादिनिपात
मव्ययं स्वरादिनिपाताश्चाव्ययसंज्ञाः स्युः स्वर् अं तर् प्रभृति प्रातर् पुनर् सनुतर् अस्तम् दर्शने उ
च्चैस् नीचैस् शनैस् ऋधक् समया निकषा ऋते वर्जने स्वयं वृथा युगपत् अधस् पृथक् ह्यस्
श्वस् आरात् दूरात् दिवा रात्रौ सायं चिरं मनाक् ईषत् जोषं तूष्णीं बहिस् आवस् आविस् न
क्तं नञ् हेतौ इद्धा अद्धा सामि वत्प्रत्ययांतं च ब्राह्मणवत् क्षत्रियवत् सना सनत् सनात् तिरस्
अंतरेण अंतरा ज्योक् शं सहसा विना नाना स्वस्ति स्वधा स्वाहा अलं वषट् अन्यत् अस्ति २६

उपांशु क्षमा विहायसा दोषा मृषा मिथ्या मुधा पुरा मिथो मिथस् प्रायस् मुहुस् बलात्कारे आ
वह्लिकं अस्तीहले साकं सार्धं सह नमस् हिरुक् धिक् तसिलादितद्धित एधाच् पर्यंतः कृत्वस् सुच्
शस् तसी आम् शालौ अथाश्चि एते प्रत्ययाः अथ आम् प्रताम् प्रशान् प्रतान् माङ् इति स्वरादिः च ॥ मङ्गादे ॥२
वा ह अह एव एवं नूनं शश्वत् कूपत् वर्त् कच्चित् यत्र तत्र नह हंत माकिं नकिं माङ् नञ्
यावत् तावत् त्वै न्वै रै श्रौषट् वौषट् स्वाहा स्वधा शम् तथा हि खलु किल तथाहि अ
थ सु स्म अस्मि अइउऋॡएऐओऔ आङ् अमा नो ना प्रतिषेधे ईषत् अकस्मात् आहद् आतं
कवेलायां माङायां यथा किं यत् हहा हे पाट् प्याट् आहो अहो नहमस्य ता
हि उताहो अमि बूहि मम इति इव चेत् फट् वषट् यदि हो हि हुंह इह तत् अहोस्वित्
उपरि मिम् किम् हिम् मां शुकं अशुकं मंदिः कं शं नो चेत् जातु कथं कुत कुत्र अतु अ
व शश्वत् हि हाहो शंवट् दिष्ट्या पशु सह आ आनुषक् अंग फाक् खाक् अरे बद्धवाहु
ऊं अं खं खुवे उपसर्गविभक्तिस्वरप्रतिरूपकाश्च तूयम् अलं सुष्ठु कामं पुरस् आशु तर्हि
रहस् सपदि इत्यादयो निपाताः प्रादयश्च कुतो अद्य इत्यादयोऽन्ये प्रयोगवशात् ज्ञेयाः तद्धि
तश्चासार्वविभक्तिः यस्मात्सर्वविभक्तेरुत्पत्तिः स तद्धितोऽव्ययम् स्यात् ततः यतः यत्र तत्र

+शुद्रीशुंद्रस्य भार्या स्यात् शुद्रा तज्जातिरंगना आभीरी तु महाशुद्री जातिपुंयोगयोः समा ४

ऋनमजंत: ऋश्योपांत: पजंतश्च सोव्ययं स्यात् स्मारं स्मारं जीवमपि बध्वा कांता शुक्रमुनः पतेः
व्ययसंज्ञास्फ: कृत्वा ब्रह्मितो विस्तृपः अव्ययात् दापुसुपः अव्ययात्परस्यापः सुपश्च लुक् स्यात् उक्तंच
सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययं १ वष्टि भागुरिरल्लोप
मवाप्योरुपसर्गयोः आपं चैव हलंतानां यथा वाचा निशा दिशा २ अवगाहः वगाहः अपिधानं
पिधानं इत्यव्ययानि अजा द्यतष्टाप् अजादिगं स्यादकारांताच्च टाप् स्यात् स्त्रियां आनिति
सामान्यार्थः तदविधानार्थश्च अन्यथा या कृतः अनेकतो नाप्राप्तौ नस्याया
तां अजाकृति: डीप् निषेधार्था अजा एड का कोकिला अश्वा चटका मूषिका
बाला होढा पाका वत्सा मंदा विलाता मध्यैः सर्वा हलंताच्च नावा वाक् दिशा दिक्
तपरं किं सोमपाः शूद्रा चामहत्पूर्वा जातिः शूद्रा जातिः किं शूद्रस्य स्त्री शूद्री अमहत्पूर्वेति किं
महाशूद्री अत्र षकरणे तदंतग्रहणात् मिषेति संसस्त्रा जिनशाणपिंडेभ्यः फलात् संफला इत्यादि
गक फलीतिकवित् संत्रास्काडप्रांतशतैकोस्य: पुष्पात् सत्पुष्पा ज्येष्ठा कनिष्ठा मध्यमेति पुं
योगेपि कोकिला जातावपि मूलान्नञः अमूला ऋन्नेभ्यो डीप् कर्त्री दंत्री अवति राज्ञी स्रनी
मघोनी मघवती इगितश्च यथा कथंचिदुगितः शब्दात् स्त्रियां डीप् विदुषी श्रीमति नवती शपश्यनोनित्यं य मु३

नतु अबाचरा केन सूत्रेण विधीयते। उच्यते आबादाने कवन् तेणू आतोव निपुकानिपुशानिवनिपुवन्यय: उणव नूइति स्थिते वनोरचेति सूत्रेण ईप्रत्य
यस्य रांतादेश: उगल् वरूई। इति स्थिते णत्वातुनातिशाकेतिसूत्रेण णकारस्य आकारः तत्रावर्ई इति सिद्धं गुणः उपचोयवायावः अजह
नैपरं भावति॥

वंती दधंती आहीनद्योर्नुम् सांती शाती कुर्वंती कुर्वती धांता कगितोन डाणावत् पर्णाक्षत् ऋन्नेभ्य
ष्टः शावी मतंवी तिरश्ची असुमुक्ष्नी प्रदीवी वनो र च वनांतात् स्त्रियां डीप् स्यात् र चांतादेशः अ
वीवरी धीवरी हरिश्चरी वनान इस: राजयुध्वा मद्द् युध्वा बहुशो हे सा बहुधीवा बहुधीवरी पा
दोन्यतरस्यां पादंतात् बहुव्रीहे: स्त्रियां डीप् स्याद्वा द्विपात् द्विपदी टाप् ऋचि ऋचिवाच्यायां पद
तात् टाप् स्यात् नडीप् द्विपदा ऋक् नषट्स्वस्रादि भ्य: पंचनतस्त्र: पंचतान्नलोपे कृतेपि ज्ञांता षट्
इति षट्संज्ञां प्रति नलोप: सुप्स्वरेति नलोपस्य सिद्धत्वात् षट्स्वस्रादिभ्य: टाप् नडीप्
मनः मन्नंतात् स्त्रियां नडीप् सीमा सीमानौ अतिमहिमानौ अनो बहुव्रीहे: नडीप्
बहुयज्वा डाबुभाभ्यामन्यतरस्यां मन्नंता दा नंतात् बहुव्रीहेश्च डाप् स्यात् वा बहु
सीमे बहुसीमानौ बहुयज्वे बहुयज्वानौ अ नोपधालोपिनोन्यतरस्यां अन्नंतात् बहुव्रीहे
रुपधालोपिनो नाडीप् स्यात् पक्षे डाप् बहुराज्ञी बहुराजानौ बहुराजे प्रत्ययस्थात्कात्पूर्वस्यात इ
दाप्यसुप: प्रत्ययस्थात् ककारात् पूर्वस्याकारस्य इकार: स्यादापि परे स आप् सुप: परोनचेत् सधि
का कारिका अत: किं नौका असुप: किं बहव: परिव्राजका यस्यां शालायां सा बहुपरिव्राज
का मामकनरकयोरुपसंख्यानं मामिका नारिका त्यक त्यपोश्च उपसंख्यानं दाक्षिणात्यका नया

प्रत्ययस्थात्ककारा त् किं शाका कथं शकनोत्युप: शाका शक्नोतीति शाका शकशाको शक प्रत्ययः शक: स्त्रीलिंगत्वाद्दाप्

शका नतु अबत्याया स्थात्पूर्वेतिसूत्रेण शा: का: श्स्य इकारक थेंनन वतेव शिका इति चेत्रोच्यते अत्र प्रत्ययस्थककारो ग्रथेनवर्तते किंतु धातो
रेव ककारो वर्तते तस्मात् अकार स्य इकारो न भवत्येव शिकान भवति किंतु शाका एवं भवतीति सिद्धं ॥ ३ ॥ २ ॥

सयोः न कात्पूर्वस्य अतः इत्वं स्यात् यका सका त्यकनश्च प्रतिषेधः अधित्यका उपत्यका आ
शिषि वुनश्च जीवका नन्दका उत्तरपदलोपे न देवदत्तिका देवका यज्ञदत्तिका यज्ञका क्षिपका
दीनां न क्षिपका ध्रुवका चटका तारका ज्योतिषि त्यारिका अष्टकापि तृदेवत्ये अष्टिकान्या सू
तिकादीनां वा सूतका सूतिका पुत्रका पुत्रिका वृंदारका वृंदारिका उदीचामातः स्थाने यक
पूर्वायाः यकपूर्वस्य स्त्रीप्रत्ययस्याकारस्य स्थाने यो अकारः तस्य कात्पूर्वस्य इकारः स्याद्वा
अपि परे कणितिक्रमः आर्यका आर्यिका चटका चटकिका आतः किं सांकाश्ये
भवा सांकाश्यिका यकेति किं अश्विका स्त्रीप्रत्ययः किं शुभं यिका यकपूर्वा
त्वं सुनयिका सुपाकिका भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि एषामत इद्वा स्यात् नञ्पूर्वा
णामपि भस्त्रका भस्त्रिका अभस्त्रका अभस्त्रिका द्वके द्विके एषका एषिका एतयोर्नञ्
पूर्वयोर्नेत्वं अनेका अद्वके भस्त्रादेरुपसर्जनत्वेऽपीष्टं निर्भस्त्रका अभाषितपुंस्काच्च एतस्मा
दतः इद्वा स्यात् गंगका गंगिका अगंगका अगंगिका परमगंगका परमगंगिका नञ्पूर्वादेवेति
त्वं अतिषड्किका आदाचार्याणां अभाषितपुंस्कादतः स्थाने आद्वा स्यात् अंगगका पक्षे पूर्वोक्तं
अक्षेप्स्वकस्यत्र भ्रुकिका टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ख्युनाम् टित् २८

टितो अनुपसर्जनेभ्यः स्त्रियां ङीप् स्यात् यस्येति च कुरुचरी नदट् नदी सौपर्णेयी ऐन्द्री औत्सी ऊरुद्वयसी
ऊरुदघ्नी ऊरुमात्री पंचतयी ठक्ठञोः आक्षिकी लावणिकी यादृशी इत्वरी आढ्यंकरणी अनु
× चौरी – पसर्जनात् किं बहुकुरुचरा तपि केचित् कश्चिन्न नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम् स्त्रैणी
पौंस्नी शाक्तीकी तरुणी तलुनी यञश्च यञन्तात् स्त्रियां ङीप् स्यात् अकारलोपे कृते हलस्तद्धितस्य ह
ल उत्तरस्य तद्धितयकारस्य ईति लोपः स्यात् गार्गी वात्सी अन यञन्तान्न ङीप् द्वीपेन वाः द्वैप्या प्राचां
× चां × ष्फ तद्धितः यञन्तात्प्रातिपदिकात् ष्फः स्यात् स्त्रियां स च तद्धितसंज्ञः षः प्रत्ययस्य इत्यस्य षकारः
इत् स्यात् आयनेयीनीयियः फढखछघां प्रत्ययादीनां प्रत्ययादेः फादीनां
आयन् एय् ईन् ईय् इय् एते क्रमात् आदेशाः स्युः ष्फः तद्धि तमिति प्रातिपदिकसंज्ञायां षिद्गौरादिभ्य
श्च षिद्भ्यः गौरादिभ्यश्च स्त्रियां ङीष् स्यात् गार्ग्यायणी वयसि प्रथमे प्रथमवयोवाचिनो अदन्तात्
स्त्रियां ङीप् स्यात् कुमारी वयस्यचरम इति वाच्यम् चिरंटी वरमेव वधूः अदंतात् किं शिशुः कन्यायाः
न द्विगोः द्विगुसमासादन्तात् ङीप् स्यात् स्त्रियां पंचमूली अजादित्वात् त्रिफला अपरिमाणबिस्ता
चितकंबलेभ्यो न तद्धितलुकि अपरिमाणान्तात् बिस्ताद्यन्ताच्च द्विगोः तद्धितलुकि न ङीप् अश्वैः क्रीता
द्व्यश्वा पंचाश्वा द्विवर्षा द्विबिस्ता परिमाणं तु प्रस्थादिकं प्रमाणे द्विगोर्नित्यमिति काण्डान्तात् न क्षे

त्रे परिमाणान्ताद्विकाण्डान्ताद्धिगोस्तद्धितलुकि न ङीप् द्वे त्रे वास्य द्विकाण्डा भूमिः द्वे त्रे वा किं द्विकाण्डी
रज्जुः प्रकृष्टात्प्रमाणान्नास्तरस्यां प्रमाणान्नास्ति प्रकृष्टां तात् द्विगोस्तद्धितलुकि ङीप् वा द्विपुरुषी द्वि
पुरुषा ऊधसोऽनङ् ऊधसं तस्य बहुव्रीहेरनङादेशः स्यात् स्त्रियां बहुव्रीहेः ऊधसो ङीप् ऊधसंतात्
बहुव्रीहेः स्त्रियां ङीप् स्यात् घटोध्नी दामहायनान्ताच्च संख्यादेर्बहुव्रीहेर्दामान्ताद्धायनान्ताच्च
स्त्रियां ङीप् स्यात् द्विदाम्नी द्विहायनी हायनांताद्वयसि ङीप् णत्वंच त्रिचतुर्भ्यां हायनस्य वयसीति त्रिहायणी च
तुर्हायणी वयसोऽन्यत्र त्रिहायना शाला अन्तर्वत्पतिवतोर्नुक् पत्युः स्त्रियां नुक् स्यात्
नान्तत्वात् ङीप् अन्तर्वत्नी पतिवत्नी गर्भिणी योगे पत्युर्विद्यते अन्यत्रान्तर्वती पतिम
ती पत्युर्नो यज्ञसंयोगे पत्युर्नकारादेशः स्यात् स्त्रियां यज्ञसंयोगे नान्तत्वात् ङीप् पत्नी
अन्यत्र गवां पतिः स्त्री वृषलपत्नी इत्युपमानं विभाषा सपूर्वस्य सपूर्वस्य पत्युः जाग्रत्कं वा दृढ
पत्नी दृढः पतिः नित्यं सपत्न्यादिषु पत्युर्नित्यं स्यात् सपत्नी एकपत्नी वृतकन्तारिव अस्या
स्त्रियां पुंयोगादाख्यायां ङीप् स्यात् पूतक्रतोरायी पुंयोगे इत्येव पूतक्रतोः स्त्री वृषाकप्यग्निकुसितकुसीदा
नामुदात्तः एषां पुंयोगे उदात्तैश्चादेशो ङीप् च वृषाकपायी मनोरौ वा मनोर्वा औ आत्स्यात् ऐश्च वा ङी
प् च मनोः स्त्री मनायी मनावी मनुः वर्णादनुदात्तोपधात्तो नः अनुदात्तान्ताद्वर्णवाचिनस्तोपधात् ङीप् वा स्या ३०

त् तकारस्य नश्च एता एनी अनु अनुदात्तोपधात् किं श्वेता अत इत्येव शितिः स्त्री पिशङ्गाच्च पिशङ्गी
असितपलितयोर्नी असितात् पलितात् क्नित्येके असिक्नी पलिक्नी अन्यतो ङीष् स्तोपधा
दन्यतो वर्णात् ङीष् स्यात् स्वरविशेषः शबली अनुदात्तात्किं कपिला षिद्गौरादिभ्य इति ङीष् गौरी नर्त्तकी
सूर्यातिष्यागस्त्यमत्स्यानां य उपधायाः यषां ईपितद्धिते च उपधायाः यलोपः स्यात् मत्स्यस्य ङ्यां सूर्याग
स्त्ययोः छेचङ्यां च तिष्यपुष्यनक्षत्रयोरणि यः लोपः इति वार्त्तिकम् मत्सी अनडुही अनड्वाही मा
तामही पितामही अनित्यः पितामही ङीष् दंष्ट्री जानपदकुण्डगोणस्थलभाजनागकालनीलकु
शकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमै
थुनेच्छाकेशवेशेषु एभ्यो यथाक्रमं वृत्त्यादिष्वर्थेषु ङीष् स्यात् जानपदी वृत्तिश्चेत् अन्यत्र जानपदा
त् ङीष् भवति जानपदी स्वरविशेषः कुण्डी अमत्रं चेत् कुण्डान्या इत्यादि औषधौ प्राणिनि च नी
ली संज्ञायां वा नीली नीला शोणात्प्राचां मते शोणा शोणी वोतो गुणवचनात् गुणवचनान्तात् उद
न्तात्स्त्रियां ङीष् स्याद्वा पट्वी पटुः उतः किं शुचिः स्त्री गुणेति किं आखुः खरुः संयोगोपधान्तस्य
नः बन्धुः पाण्डुः बह्वादिभ्यश्च बह्वी बहुः पद्धती पद्धतिः इत्यादि इतः प्राण्यङ्गात् अङ्गुली अङ्गुलिः
कृदिकारादक्तिनः वा ङीष् सर्वतोऽक्तिन्नर्थादित्येके रात्री रात्रिः आजी आजिः अक्तिनः किं बुद्धिः

मतिः अक्तिन्नर्थिकं स्तनिः स्तानिः पुंयोगादाख्यायां यापुमाख्या पुंयोगात् स्त्रियां वर्त्तते ततः स्त्रि
यांङीष् गोपी गोपालिकादीनां न सूर्याद्देवतायां न ङीष् सूर्यस्य स्त्री देवता सूर्या अन्या सूरी इं
द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् इंद्रादेः स्त्रियां ङीष् आ
नुकागमः स्यात् इंद्राणी इत्यादि ब्रह्माणीति केचित् हिमारण्ययोर्महत्त्वे महद्धिमं हिमानी अर
ण्यानी यवाद्दोषे दुष्टो यवो यवानी यवनाल्लि प्यां यवनानी मातुलोपाध्याययोर्वा मातुला
नी मातुली उपाध्यायानी उपाध्यायी आच र्यादणत्वं च आचार्यानी आचार्या आ
र्यक्षत्रियाभ्यां वा स्वार्थे आर्याणी आर्या क्षत्रियाणी क्षत्रिया पुंयोगे तु आर्य
आर्यी क्षत्रियी सूर्याणी वेति केचित् क्रीतात् करणपूर्वात् क्रीतांतात्करणपूर्वात्स्त्रि
यां ङीष् स्यात् वस्त्रक्रीती क्वचिन्न धनक्रीता। क्तादल्पाख्यायां करणादेः क्तांतात् अल्पा
ख्यायां ङीष् स्यात् अभ्रलिप्ती बहुव्रीहेश्चांतोदात्तात् बहुव्रीहेः क्तांतात् अंतोदात्तात् स्त्रियां ङी
ष् स्यात् ऊरुभिन्नी जातांतान्न दंतजाता बहुनञ्सुकालसुखादिपूर्वान्न बहुकृता
इत्यादि पाणिगृहीती भार्या पाणिगृहीताऽन्या अस्वांगपूर्वपदाद्वा अस्वांगादेः क्तांतात् बहुव्रीहेः
वा ङीष् सुरापीति सुरापीता अस्वांगपूर्वपदात् किं ऊरुभिन्ना शंखभिन्नी दंतौ दंता किं वक्ष आ

MEMORIAL

अद्रवमिति॥ सुस्वेदा ... मूर्तिमदिति ... प्राणिस्थमिति ... अविकारजमिति ... अतत्स्थमिति ... प्राणिसदृशात् ...
ह अद्रवमिति स्वेदस्य द्रवरूपत्वात् न ... इति ... स्वांगसाद्गुण्यात् प्राणिस्थात् ... मूर्तिमदिति ... परिमाणयोगित्वं मू
र्तत्वं ... अविकारजं विकारो वातादिदोषः ... विकारजं न विकारजं अविकारजं ... सुविकार
जः ... नासिकोदरादीनां ... प्राणिस्थात् ... प्राणिनि तिष्ठतीति ... अप्राणिस्थस्यापि

छिन्ना स्वांगाच्चोपसर्जनादसंयोगोपधात् असंयोगोपधात् स्वांगादुपसर्जनात् स्त्रियां ङीष् वा स्यात् सुमुखी सुमु
खा अतिकेशी अतिकेशा संयोगोपधात्तु सुगुल्फा अंगगात्रकंठेभ्यस्तु इष्यते स्वंगी स्वंगा इत्यादि
अद्रवं मूर्तिमत्स्वांगं प्राणिस्थमविकारजं अतत्स्थं तत्र दृष्टं चेत् तेन चेत्तत्तथायुतं १ बहुस्विदाद्रवं
त्वात् सुज्ञाना अमूर्तत्वात् सुमुखा शाला अप्राणिस्थत्वात् सुशोफा विकारजत्वात् सुकेशी सुके
शा रथ्या अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात् सु स्तनी सुस्तना प्रतिमा प्राणिवत् प्राणिसदृश
स्थितत्वात् नासिकोदरोष्ठजंघादंतकर्णशृंगाच्च एतदंतात् स्त्रियां ङीष् वा सुनासिकी
सुनासिकेत्यादि पुच्छाच्च सुपुच्छी सुपुच्छाः कबरमणिविषशरेभ्यो नित्यं कबरपुच्छी
इत्यादि उपमानात्पक्षाच्च पुच्छाच्च उपमानपक्षी उलू कपुच्छी नक्रोडादिबह्वचः क्रोडादेर्बह्व
चश्च स्वांगान्न ङीष् सुक्रोडा आकृतिगणोयं सु जघना सहनञ्विद्यमानपूर्वाच्च एतत्पूर्वा
त्स्वांगान्न ङीष् सकेशा अनासिका विद्यमानोदरा नखमुखात्संज्ञायां सूर्पणखा गौरमुखा
असंज्ञायां तु ताम्रनखी वाहः वाहंतात् स्त्रियां ङीष् स्यात् सख्यशिश्वीति भाषायां एतौ निपात्येते भा
षायां जातेरस्त्रीविषयादयोपधात् जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां
ङीष् स्यात् मृगी हंसी ब्राह्मणी घटीमात्र वरणावपि जातिरिष्यते नाडायनी कठी बह्वृची जाते

केशादिर्स्वीग
स्यात् यदि तत्र
प्राणि निष्टं स्यात्
तु एवमपि प्रति
मेवेयत्वा नासेषा
दीनां स्वांगता।
न स्यात् अतएव
जितप्राणि येन
ङीष् वा ५॥
धकारेण मंस्वा
विशेषणमं बहु
तथाद्यद्यप्राणि
नामबहुस्यात्
अथवा तेन चेत
अथा तेन वान
घायुक्तं स्याद्य
था प्राणिद्रव्य
मेवमपि स्यात्
स्यादिति सर्वथा
अयमर्थः याद्दशः
प्राणिनो मुखा
दिस्वांगं तादृशं
मेव यद्यप्राणि
नः स्यात् एवमपि
स्वांगमेवेति १
स्त्रीप्रत्ययमध्ये

किं मुंडा स्त्री विषयाद्बलाका अयोपधात्किं क्षत्रिया गवयहयमुकयमत्स्यमनुष्याणामप्रतिषेधः ग
वयी इत्यादि पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च पाकाद्युत्तरपदाज्जातिवाचिनः
स्त्रीविषयाच्च ङीष् स्यात् ओदनपाकी शंकुकर्णी शालपर्णी शंखपुष्पी दासफली दर्भमूली
गोवाली इतो मनुष्यजातेः इदंतान्मनुष्यजातेः स्त्रियां ङीष् अवंती दाक्षी ऊङुतः उदंतान्मनुष्
यजातेः स्त्रियां ऊङ् स्यात् सवर्णदीर्घः कुरूः इवर्च योयमेकादेशः सवर्णस्यांतवत्परस्मा
दिवत्स्यात् इत्यादिवचनात् स्वाद्युत्पत्तिः अयोपधादित्येव अध्वर्युः अप्रा
णिजातेश्चारज्ज्वादीनामिति वाच्यम् कर्कंधूः रज्जुः हनुः पंगो
श्च श्वशुरस्योकाराकारलोपश्च श्वश्रूः ऊरूत्तरपदादौपम्ये उरूत्तरपदात्स्त्रियां ऊङ्
स्यात् औपम्ये करभोरूः संहितशफलक्षणवामादेश्च संहिताद्यादेरूरूत्तरपदात्स्त्रियां ऊङ् स्या
दनौपम्येपि संहितोरूः इत्यादि सहितसहाभ्यां च सहितोरूः सहोरूः तच्चादवेतिके चित्त त्र
तत्र संज्ञः चेत् संज्ञायां कद्रुकमंडल्वोश्छंदसि स्त्रियामूङ् स्यात् अत्र दीर्घवचनं कद्रूः कमंड
लूः शार्ङ्गरवाद्यञो ङीन् शार्ङ्गरवादेरञंतात् जातिवाचिनः स्त्रियां ङीन् स्यात् स्वरविशेषः
शार्ङ्गरवी इत्यादिः नृनरयोर्वृद्धिश्च नारी यङश्चाप् यङंतात् स्त्रियां चाप् स्यात् चकारः स्वरार्थः ३१

नत्वयं घटः देवदत्तेन क्रियते देवदत्तः घटं करोति इति कर्त्रैव न उक्तिः ... कर्मैव तु क्रियते अत्र तु घटे कर्म अक्तं ... कर्माभिधाने यत्र कर्म तु क्तं न भवति यत्र कर्मत्वं न वति न च प्रथमा न वति = ... न ह्यते ... परार्थत्वाल्लंबन ... = २ ... मसेविति तिङ् उक्तो यथा देवदत्तेन हरिः सेव्यते ... कर्तत्र उक्तो यथा ... तद्धितो क्तो यथा ... समासोक्तो यथा प्राप्तानंदः ...

क्रोष्टव्यं क्रोष्टा ... आपूर्वः ... पौतिमाष्या युवतिः यूनस्तिः यूनः स्त्रियां तिः स्यात्
ङीपापवादः तद्धितत्वात् स्वाद्युत्पत्तिः युवतिः स्त्रीप्रत्ययाः समाप्ताः ब: प्रातिपदिकार्थलिंगपरि
माणवचनमात्रे प्रथमा प्रातिपदिकार्थः सत्तामात्रं अत्र श्रवणमुख्य प्रयोगः मन्मा त्रादिष्वर्थेषु प्रथमा स्या
त् उच्चैः नीचैः कृष्णः श्रीः ज्ञानं तटः तटी तटं द्रोणः एकः द्वौ बहवः कृदर्थयुक्तं तद्धितार्थं अपगवः समा
सार्थं चित्रगुः संबोधने च संबोधने च प्रथमा स्या त् हे राम कर्तुरीप्सिततमं कर्म कर्तुः क्रियया
आप्तुमिष्टतमं कर्मसंज्ञं स्यात् कर्मणि द्वितीया यतिङ् कृत्तद्धितसमासैरनुक्ते कर्मणि द्विती
या स्यात् हरिं भजति तिङाद्युक्तेभिहितकर्मणि इकारके प्रातिपदिकार्थ इति प्रथमा सेव्य
ते सेवितो हरिः लक्ष्म्या प्राप्तानंदः सख्या हरिः तद्धितोक्ते शतेन क्रीतः शत्यः तथायुक्तं चा
नीप्सितं ईप्सिततमवत् क्रियया युक्तमनीप्सितं सत् कर्मसंज्ञं स्यात् ग्रामं गच्छन् तृणं स्पृशति अकथितं च अपादानादिविशेषैरविवक्षितं कारकं कर्मसं
ज्ञं स्यात् दुह्याच्पच्दंड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषां कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहां दुह्यादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यु
क्तं ... गां दोग्धि पयः बलिं याचते वसुधां ... अविनीतं विनयं याचते तंडुलानोदनं पचति गर्गान् शतं दंडयति व्रजमवरुणद्धि गां माणवकं पंथानं पृच्छति वृक्षमवचिनोति फलानि माणवकं धर्मं ब्रूते शास्ति वा
शतं जयति देवदत्तं सुधां क्षीरनिधिं मथ्नाति देवदत्तं शतं मुष्णाति ग्राममजां नयति हरति कर्षति वहति वा ...

... एक्षिता दुहन्वत्पाप्रणो दंडयंते ... प्रश्नो ... कर्म ... योगेन अपादानादिष्विति ...

धूर्तं कृष्णोऽमहरत् पुरीं चकर्ष कंसं विपिनं ममंथ क्षीरधिं सुधां ४ अवहन्नाद्रिं भिक्षमरुंदयदर्शन्
सूनुं जगाद कृतकंसाकं मधुपानाद्विति जानसुधां ५ पचति पाणिनां कर्म यः फलं संहरति सः इत्याद
यो द्विकर्मकाः गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणां अणि कर्ता स णौ गत्यर्थानां णौ यः क
र्ता स णौ तेषां कर्मसंज्ञः स्यात् शत्रून् गमयत्स्वर्गं वेदार्थं स्वान् वेदयत् आशयच्चामृतं देवान्
वेदमध्यापयद्विधिं आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः १ नीवह्योर्न नाययति वाहयति
न नियन्तृकस्य वहेरनिषेधः वाहयति रथं वाहान् सूतः आदिखाद्योर्न आदयति खाद
यति वान्नं बटुना भक्षेरहिंसार्थस्य तत्र यत्समात्समरीन् राजा अग्रहेद्धामिति
केचित् श्रावयति गीतं श्रोतृन् आरसमति वा। डुंबेदं दर्शयति सत्कान् देवं अयकं दर्शा
यकान् नतिकेचित् आर्ययति रमनिकिंरी नुकंदयति से निकेः आश्रायपति कायपति वा
रिपुं स्वरः हृक्रोरन्यतरस्यां हृक्रोरणि यः कर्ता स णौ वा कर्मसंज्ञः स्यात् हारयति कारयति वा
भृत्यं भृत्येन वा कटं अभिवादिदृशोरात्मनेपदे सति वा वाच्यम् अभिवादयति दर्शयते वा दे
वं भक्तेन भक्तं वा अधिशीङ्स्थासां कर्म अधिपूर्वाणामेषामाधारः कर्मसंज्ञः स्यात् अधिशेते
अधितिष्ठति अध्यास्ते वा वैकुंठं हरिः अभिनिविशश्च अभिनिविपूर्वस्य विशतेराधारः कर्म ३२

स्यात् सन्मार्गमभिनिविशते क्वचिन्न पापेऽभिनिविशते उपान्वध्याङ्वसः उपादिपूर्वस्य वसतेराधारः
कर्म स्यात् उपवसति अनुवसति अधिवसति आवसति वा वैकुंठं हरिः अभुक्त्यर्थस्य न वने उपव
सति अधिवसति अभितः सर्वतसोः कार्या धिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्य
ते २ अभितः गोपाः कृष्णं सर्वतः धिग् कृष्णाभक्तं उपर्युपरि लोकं हरिः अध्यधि लोकं अधो
लोकं उलयत समया निकषा हाप्रतियोगेऽपि अभितः अभितः कृष्णं प्रति कृष्णं इत्यादि
अन्तरान्तरेण युक्ते आभ्यां योगे द्वितीया स्यात् अंतरा त्वां मां हरिः अंतरेण हरिं न सुखं अ
नुर्लक्षणे लक्षणे द्योत्ये अनुः कर्मप्रवचनी यसंज्ञः स्यात् गत्युपसर्गसंज्ञापवादः
कर्मप्रवचनीययुक्ते द्वितीया कर्मप्रव चनीययोगे द्वितीया स्यात् जपमनुप्रावर्ष
त् अनुस्तृतीयार्थे तृतीयार्थे अनुः कर्मप्रवचनीयसंज्ञः नदी मन्ववसिता सेना तया सह संबद्धेत्यर्थः हीने
हीने द्योत्ये सति अनुः कर्मप्रवचनीयसंज्ञः अनु हरिं सुराः उपोऽधिके च उपश्च शेषे अधिके च हीने कर्मप्रवचनीय
संज्ञः उप हरिं सुराः अधिके सप्तमी वक्ष्यते लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः एषुर्थे
षु एते कर्मप्रवचनीयसंज्ञाः स्युः हरिं प्रति परि हरिमनु हेतो तृतीयसंज्ञा बाधितं अनुर्लक्षणे इति सूत्रं इहेदं
तास्थाने भक्तो विष्णुं प्रति परि अनु वा भागे लक्ष्मीः हरिं प्रति परि हरिं अनु वा वीप्सायां वृक्षं वृक्षं

ष्णुं प्रति परि अनु वा वत्सः पशु किं परिषिंचति अत्रोपसर्गत्वेन षत्वं अभिरभागे भागवर्जे लक्षणा-
दौ अभिरुक्तसंज्ञः हरिमभिवर्त्तते भक्तो विष्णुमभि देवं देवमभि सिंचति अभागे किं यदत्र ममाभिष्या-
त्तद्दीयतां अतिरतिक्रमणे च अतिक्रमणे पूजायां च अतिः कर्मप्रवचनीयसंज्ञः अति सुरान् कृष्णः
कालाध्वनोरत्यंतसंयोगे गुणक्रियाद्रव्यैः कालाध्वनोरत्यंतसंयोगे द्वितीया स्यात् मासं कल्याणी
मासमधीते मासं गुडधाना क्रोशं कुटिला नदी क्रोशं गच्छति क्रोशं गिरिः स्वतंत्रः कर्त्ता क्रियायां
स्वातंत्र्येण विवक्षितोर्थः कर्त्ता स्यात् साधकतमं करणं क्रियासिद्धौ प्रकृष्टोपकार-
कं करणं स्यात् कर्तृकरणयोस्तृतीया अनभिहिते कर्त्तरि करणे च तृतीया स्यात्
रामेण बाणेन हतो वालिः तिङाद्युक्तौ करणे तिहरिः जीवनग्राष्टिकः कृत विश्वः प्रकृ-
त्यादिभ्यः तृतीया प्रकृत्या चारुः प्रायेण याज्ञिकः समेनैति विषमेणैति द्विद्रोणेन धान्यं करोति
पंचकेन पशून् गृह्णाति दिवः कर्म च दिवः साधकतमं कर्मसंज्ञं वा स्यात् अक्षैः अक्षान्वा दीव्यति
अपवर्गे तृतीया अपवर्गः फलप्राप्तिः तस्यां द्योत्यायां कालाध्वनोरत्यंतसंयोगे तृतीया स्यात् अ-
ह्ना क्रोशेन वानुवाकोधीतः अपवर्गे किं मासमधीते नायातः सहयुक्तेऽप्रधाने सहार्थयुक्तेऽप्र-
धाने तृतीया स्यात् पुत्रेण सहागतः पिता एवं साकं सार्धं समं योगेपि विनापि तद्योगे तृतीया वृद्धो यूनेति द- ३२

त्वनात् येनांगविकारः येनांगेन विकृतेनांगिनो विकारस्ततस्तृतीया स्यात् अक्ष्णा काणः इत्थंभूत-
लक्षणे किं चित्प्रकारं प्राप्तः इत्थंभूतः तल्लक्षणे तृतीया स्यात् छात्रेण उपाध्यायमद्राक्षीत्
संज्ञोन्यतरस्यां कर्मणि संपूर्वस्य जानातेः कर्मणि तृतीया वा स्यात् पित्रा पितरं वा संजानीते हे-
तौ हेतुवाचिनस्तृतीया स्यात् पुण्येन दृष्टो हरिः मानाधीज्ञायां कर्मणि तृतीया वेविके चित् अतंत्र
तं वत्सान्पाययति पयः श्रोतेन श्रातेन वा धारणा र्थयोगे तृतीया अलं विलंबेन तृतीया तत्कृता-
र्थेनेति तृतीयासमासोक्तेरर्थ अष्ट योगे तृती यामता मयाहिरिलक्ता पूर्वावरेनार्थादि-
योगेपि मासेन पूर्वः अवरः पुण्येन हीनः शस्त्रेण कलहः गुडेन मिश्रः असिष्ट
व्यवहारे चतुर्थ्यर्थे तृतीया दास्या संयच्छते कामुकः धर्मे तु दास्यै संयच्छति कर्मणा य-
मभिप्रैति स संप्रदानः दानस्य कर्मणा यमभिप्रै तिस संप्रदानसंज्ञः स्यात् चतुर्थी संप्रदाने संप्र-
दाने चतुर्थी स्यात् विप्राय गां ददाति अनभिहित इत्येव दानीयो विप्रः क्रियया यमभिप्रैति सोपि
संप्रदानं पत्ये शेते अज्ञः कर्मसंप्रदानयोः करणकर्मत्वे वाच्ये पशुना रुद्रं यजते पशुं रुद्राय ददा-
तीत्यर्थः रुच्यर्थानां प्रीयमाणः रुच्यर्थानां प्रयोगे प्रीयमाणोर्थः संप्रदानसंज्ञः स्यात् हरये रोच-
ते भक्तिः श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः श्लाघादीनां प्रयोगे ज्ञीप्स्यमानः संप्रदानं स्यात् गोपी स्मरात् कृ-

गाहि नया घिंतवान् अघ वदीयमानामतु मन्यते स इ
कुंतमिति ५

ज्ञायते न पति न लि
प्रित वाति मा लि प्रत्ये
नारस्य ज्ञात इत्यर्थ

संप्रदानं न देवस्या
न पूजा तु गृहकाम्य
यादौ यस्माद्येन संयो
गो त्वामिच्छलसते य
दि संप्रदानं विविधं श्र
नरा कर्तृ प्रेरकमड
मं तृच्चेति तत्रानिरा
कर्तृ यथा अादित्या
य पुष्पं ददाति नात्रा
दित्यः प्रार्थयते सानु
मनो तेन च निरा करे
ति प्रेरकं यथा विप्रा
य गां ददाति विप्रेण
हि गाम हृदे हि इति
प्रेरितो ददाति अनुमं
तृ य यथा उपाध्याय

णाय श्लाघते ह्नुते तिष्ठते शपते धारेरुत्तमर्णः करकसंज्ञः भक्ताय धारयति मोक्षं हरिः स्पृहेरीप्सितः
स्पृहते रिष्टः संप्रदानं स्यात् हरये स्पृहयति क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः क्रुधाद्यर्थानां योगे
यं प्रति कोपः स उक्तसंज्ञः हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति गोपीभ्य राधा सा प्रति कोपः किं
नार्यो ईर्ष्यति मैनामन्यो द्राक्षीत् क्रुधद्रुहोरुपसृष्टयोः कर्म उपसृष्टयोरेतयोः प्रायुक्तं कर्म वा
स्यात् क्रूरमभि क्रुध्यति अभिद्रुह्यति राधीक्ष्योः यस्य विप्रश्नः एतयोः कारकं संप्रदानं स्यात् य
स्य विविधः प्रश्नः क्रियते कृष्णाय राध्यति ईक्षते तस्मा इष्टो गर्गः शुभाशुभं पर्यालोचयतीत्य
र्थः प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता आभ्यां पर स्य शृणोतेर्योगे पूर्वस्याः प्रवर्तनक्रियायाः
कर्ता संप्रदानसंज्ञः स्यात् विप्राय गां प्रतिशृ णोति प्रतिजानातीत्यर्थः अनुप्रतिगृणश्च
अस्य धातोः कारकं पूर्वस्य कर्तृभूतं संप्रदानं स्या त् होत्रे अनुगृणाति प्रतिगृणाति होतारं प्रसंत
श्रोत्साहयतीत्यर्थः परिक्रयणे संप्रदानमन्यतरस्यां नियतकालं भृत्यादिस्वीकरणं परिक्रयः तत्कर
णं संप्रदानं वा स्यात् शताय शतेन वा परिक्रीतः तादर्थ्ये चतुर्थी वक्तव्या मुक्तये हरिं भजति क्लृप्यर्थे सं
पद्यमाने च तत्कि ज्ञानाय कल्पते संपद्यते जायते इत्यर्थः उत्पातेन ज्ञापिते च वाताय कपिला विद्युत्
हितयोगे च ब्राह्मणाय हितं क्रियार्थोपपदस्य कर्मणि स्थानिनः क्रियार्था क्रियोपपदं यस्य तस्य स्था ३४

निनः अप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी फलेभ्यो याति फलान्याहर्तुं यातीत्यर्थः तुमर्थाच्च भा
ववचनात् तुमर्थात् भाववाचिनो घञादयस्तदंताच्चतुर्थी स्यात् यागाय याति यष्टुं यातीत्यर्थः नमः
स्वस्तिस्वाहास्वधालंवषट्योगाच्च एभिर्योगे चतुर्थी स्यात् हरये नमः इत्यादि अलमिति पर्याप्त्यर्थग्र
हणं तेन दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्तः इत्यादि आशिषि षष्ठी चाधिश्च चकारः स्वस्ति गोभ्यो
भूयात् उपपदविभक्तेः कारकविभक्तिर्बलीयसी तेन नमस्यति योगे द्वितीयैव नमस्करोति देवान्
मन्यकर्मण्यनादरे विभाषाप्राणिषु प्राणिव र्जं मन्यतेः कर्मणि वा चतुर्थी स्यात् अनादरे
त्वां तृणाय मन्ये त्वां तृणं मन्ये अना दरे किं देवं त्वां मन्ये अप्राणिष्विति नौका
कान्नशुकशृगालवर्जेष्विति वाच्यं नेह न॥ त्वां नावं मन्ये इत्यादि गत्यर्थकर्मणि द्वितीया
चतुर्थ्यौ चेष्टायामनध्वनि गत्यर्थानां धातूनां का॥ र्मण्यध्ववर्जे द्वितीयाचतुर्थ्यौ स्तः चेष्टायां व्रज
वृन्दाय व्रजति वृन्दं व्रजति चेष्टायां किं मनसा वनं याति अनध्वनि किं मार्गं याति उत्पथगतौ स्यादेव
उत्पथेन पथं गच्छति द्वितीयाग्रहणं कृद्योगे षष्ठी बाधितुं ग्रामस्य गंता ग्रामं गंता ध्रुवमपायेऽपा
दानं अपायो विश्लेषस्तस्मिन्साध्ये यत् ध्रुवं अवधिभूतं तदपादानसंज्ञं स्यात् अपादाने पंचमी
अपादाने कारके पंचमी स्यात् ग्रामादागच्छति धावतोऽश्वात्पतति जुगुप्साविरामप्रमादार्थाः यत्तत्त

दपादानसंज्ञः स्यात् पापाद्विरमति धर्मात्प्रमाद्यति भीत्रार्थानां भयहेतुः भयार्थानां त्राणार्थानां प्रयोगे भ
यहेतुरपादानं स्यात् चौराद्बिभेति चौरात्त्रायते पराजेरसोढः पराजेः प्रयोगे असह्योऽर्थोऽपादानं
स्यात् पापात्पराजयते वारणार्थानामीप्सितः वारणार्थानां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात् यवेभ्यो गां
वारयति अंतर्द्धौ येनादर्शनमिच्छति अंतर्द्धिर्व्यवधानं तन्निमित्तमात्मनो येनादर्शनमिच्छति तदपाद
नं स्यात् मातुर्निलीयते कृष्णः आख्यातोपयोगे उपयोगे नियमपूर्वकविद्यास्वीकारे आख्याता अपादानं
स्यात् ब्रह्मणः प्रजाः प्रजायंते भुवः प्रभवः। प्रभवनं भुवः कर्तुः प्रभवस्तथा हिमवतो
गंगा प्रभवति प्रथमं दृश्यत इत्यर्थः ल्यप् लोपे कर्मण्यधिकरणे च पंचमी वाच्या
आसनात्प्रेक्षते प्रासादात्प्रेक्षते आसने उप विश्य प्रासादमारुह्य प्रेक्षत इत्यर्थः प्रश्ना
ख्यानयोश्च कस्मात्त्वं नद्याः यतश्चाध्वकालनि र्माणं तत्र पंचमी तद्युक्तादध्वनः प्रथमास
प्तम्यौ स्तः कालात्सप्तमी वनाद्ग्रामो योजनं योजने वा कार्त्तिक्याः आग्रहायणी मासे अन्य
तरादितरर्ते दिक्शब्दांचूत्तरपदाजाहियुक्ते एतैर्युक्ते पंचमी अन्य इत्यर्थग्रहणं अन्यः कृ
ष्णात् भिन्नो रामात् आरात् राम इतरो रामात् ऋते कृष्णात् दिक्शब्दात् पूर्वो ग्रामात् अयमस्मा
त्पूर्वः अंचूत्तरपदे प्राक् प्राक्प्रत्यग्ग्रामात् आच दक्षिणा ग्रामात् आहि दक्षिणाहि ग्रामात् आ

उपाध्यायादधीते॥ जनिकर्तुः प्रकृतिः जायमानस्य प्रकृतिरेव रपादानं

३५

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इत्यस्य स्मारकम्

रस्यार्थयोगे प्रीतिकिंचित् सनादारस्य वनात्स्वतिमेभ्यो हरिः बहिर्योगे च ग्रामाद्बहिः अपपरिव
र्जने एतौ वर्जने कर्मप्रवचनीयौ स्तः आङ् मर्यादावचने आङ् मर्यादार्थे प्रोक्तः संज्ञः वचनग्रहणा
दभिविधावपि पंचम्यपाङ्परिभिः एतैः कर्मप्रवचनीयैर्योगे पंचमी स्यात् अप हरेः परि हरेः संसारः परि
रत्र वर्जने लक्षणादौ तु हरिं परि आमुक्तेः संसारः आसकलाद्ब्रह्म प्रतिः प्रतिनिधिप्रतिदानयोः अनयो
रर्थयोः प्रतिः कर्मप्रवचनीयः स्यात् प्रतिनिधिः प्रति दानेन यस्मात् यस्मात्प्रतिनिधिः प्रतिदाने तः त
त्र कर्मप्रवचनीययुक्ते पंचमी स्यात् प्रद्युम्नः कृ ष्णात्प्रति तिलेभ्यः प्रतियच्छति माषान् अकर्त
र्यृणे पंचमी ऋणात्कर्तारक हेतुर्विवक्षितः तु पंचमी स्यात् शताद्धृणाद्बद्धः अकर्तरि
किं शतेन बंधितः विभाषा गुणेऽस्त्रियां गुणहेतौ वस्त्रीलिंगे वा पंचमी स्यात् तृतीया स्तः जाड्यात्
जाड्येन वा बद्धः गुणे किं धनेन कुलं अस्त्रियां किं बु द्ध्या मुक्तः पृथग्विनानानाभिस्तृतीयान्यतरस्यां
एतैर्योगे तृतीया स्यात् वा पक्षे पंचमी द्वितीया च पृथग्रामेण रामात् रामं वा इत्यादि करणे च स्तोकाल्प
कृच्छ्रकतिपयस्यासत्त्ववचनस्य एभ्योऽसत्त्ववचनेभ्यः करणे तृतीयापंचम्यौ स्तः स्तोकेन किं मुक्तः स्तोका
न्मुक्तः इत्यादि असत्त्वेति किं स्तोकेन विषेण हतः दूरांतिकार्थेभ्यो द्वितीया च दूरांतिकार्थेभ्योऽसत्त्ववचने
भ्यः प्रातिपदिकार्थे द्वितीयापंचमीतृतीयाः स्युः ग्रामस्य दूरं ग्रामस्यांतिकं दूरात् दूरेण वा षष्ठी शेषे

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिसंबंधादिः शेषः तत्र षष्ठी स्यात् यद्वा अप्रधानं शेषः तेन द्वयो
ःपर्यायेण वा नु स्यात् राज्ञः पुरुषः कर्मणप्राप्तिकेचित् न ऊचुः शेषे षष्ठी हेतुप्रयोगे हेतु
शब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात् अन्नस्य हेतोर्वसति सर्वनाम्नः तृतीया च सर्वनाम्नो हेतुप्रयोगे
तृतीया स्यात् षष्ठी च कस्य हेतोः केन हेतुना इत्यादि सर्वनाम्नः प्रयोगे निमित्तकारणहेत्वर्थेषु सर्वा
स्यामिष्टिः किं निमित्तं केन निमित्तेनेत्यादि एवं किं कारणं किं प्रयोजनं किमर्थमित्यादि निमित्ता
दिप्रयोगे सर्वनाम्नाऽप्रयोगेऽपि प्रातिपदिकमात्रा त्तृतीया दृश्य केचित् ज्ञानेन निमित्तेन
हरिः सेव्यः षष्ठ्यतसर्थप्रत्ययेन एतद्योगे ष ष्ठी स्यात् दक्षिणतो ग्रामस्य पुरस्ताद्ग्रा
मस्य एनया योगे द्वितीया एनया योगे द्वितीय ा स्यात् षष्ठी च दक्षिणेन ग्रामं ग्रामस्य वा दूरां
तिकार्थैस्युः षष्ठ्यन्यतरस्यां एतैर्योगे षष्ठी वा स्यात् पक्षे पंचमी दूरं निकटं ग्रामस्य ग्रामाद्वा ज्ञोवि
दर्थस्य करणे जानातेरज्ञानार्थस्य करणे षष्ठी स्यात् सर्पिषो जानाति सर्पिषा करणभूतेन प्रव
र्तते इत्यर्थः अविदर्थस्य किं स्वरेण पुत्रं जानाति अधीगर्थदयेशां कर्मणि एषां कर्मणि शेषत्वेन वि
वक्षिते षष्ठी स्यात् अधीगर्थाः स्मृत्यर्थाः मातुरध्येति पितुः स्मरति सर्पिषो दयते एधानामीष्टे शेष
इत्येव मातरं स्मरति कृञः प्रतियत्ने गुणाधानार्थे कृञः कर्मणि षष्ठी स्यात् एधोदकस्योपस्कुरुते ३६

रुजार्थानां भाववचनानामज्वरेः भाववचनानां रुजार्थानां ज्वरवर्जितानां कर्मणि षष्ठी स्यात् चौरस्य
रुजति रोगः भाव इति किं नदी कूलं रुजति अज्वरिसंताप्योरिति वाच्यं चौरं ज्वरयति संतापयति वा शे
षएव चौरं रुजति रोगः आशिषि नाथः नाथते कर्मणि षष्ठी स्यात् आशिषि सर्पिषो नाथते आशि
षि किं वटुं नाथति याचत इत्यर्थः जासिनिप्रहणनाटक्राथपिषां हिंसायां एषां हिंसार्थानां कर्मणि षष्ठी
स्यात् चौरस्य उज्जासयति निप्रौ संहतौ व्यस्तौ वि पर्यस्तौ वा चौरस्य निप्रहंति निहंति प्रहंति प्रणि
हंति वा चौरस्योन्नाटयति क्राथयति पिनष्टि हिंसायां किं धानाः पिनष्टि शेष एव चौरं
निहंति व्यवहृपणोः समर्थयोः एतयोः कर्तव्य व्यवहारे समानार्थयोः कर्मणि षष्ठी स्यात् श
तस्य व्यवहरते पणते वा समर्थयोः किं शलाकां व्यवहरति ब्राह्मणं पणायति स्तौतीत्यर्थः शे
ष एव शतं व्यवहरते दिवस्तदर्थस्य कृतार्थस्यादि वः कर्मणि षष्ठी शतस्य दीव्यति विनोपसर्गे
शतस्य शतं वा प्रतिदीव्यति कृत्वोऽर्थप्रयोगे कालेऽधिकरणे कृत्वोऽर्थानां प्रयोगे कालवाचिन्यधिकर
णे षष्ठी स्यात् पंचकृत्वोऽह्नो भुंक्ते द्विरह्नो भुंक्ते शेष एव द्विरहन्यधीते कर्तृकर्मणोः कृति कृत्प्रत्ययस्य यो
गे कर्तरि कर्मणि षष्ठी च स्यात् कृतिस्य कृतिः जगतः कर्ता कृत्स्य कृति किं तद्धितेन त्वत् कृतपूर्वी क
टं शेष इत्येव निष्ठल्लं उभयप्राप्तौ कर्मणि उभयोः प्राप्तिर्यस्मिन् कृति तत्र कर्मण्येव षष्ठी चित्रं गवां दोहो

गोपेन नेदिक्ता विनस्य वा कृष्णस्य जगतः शेषे स्त्रीप्रत्यये वा विचित्रा जगतः कृतिर्हरेः हरिणा
वा केचित् विशेषेण विनाषा मिच्छंति शब्दानामनुशासनं आचार्येण आचार्यस्य वा क्तस्य च वर्तमाने व
र्तमानार्थस्य क्तस्य योगे षष्ठी स्यात् सतां ज्ञातः नपुंसके भावे क्तस्य योगे शेषविवक्षायां वा सतां संग
तं कर्तृत्वेन सङ्गिरितं अधिकरणवाचिन क्तस्य योगे षष्ठी इदमेषामासितं नलोकाव्ययनिष्ठाख
लर्थतृणां एषां प्रयोगे न षष्ठी लादेशाः कुर्वन् कुर्वाणः नकुर्वान् चक्राणः सक्तिं वा हरिं
हरिः तृहरिं दिदृक्षुः अलंकारिष्णुर्वा धकन्दे त्यानु घातुको हरिः कमेरनिषेधः लक्ष्माका
मुको हरिः अव्ययं जगत् सृष्टा सुखं कर्तुं निष्ठा दैत्यान् हतवान् विष्णुना हता
दैत्याः खलर्थाः ईषत्करः प्रपंचो हरिणा तृन्नि तिशत्रृशानच्कारेण शतोनकारेण प्रत्याहारः
आनश्चासामप्रत्ययाः चानशु आत्मानं मंडयमा नः शत्रृवेदमधीयन् तृन् कर्ता लोकान् द्विष
शत्रुर्वा मुरस्य मुरं वा द्विषन् आकेनोनविष्यदाधमर्ण्ययोः भविष्यतिकस्य तद्भविष्यदाधमर्ण्यार्थ
योगे षष्ठी न जगत्पालकोऽवतरति व्रजंगामी मुरममृणं दायी कृत्यानां कर्तरि वा कृत्यानां प्रयो
गे कर्तरि वा षष्ठी वा मया मम सेव्यो हरिः उभयप्राप्तौ कृति षष्ठी न नेतव्याः व्रजं गावः कृष्णेन तुल्या
र्थैरतुलोपमाभ्यां तृतीयान्यतरस्यां तुल्यार्थयोगे तृतीयाषष्ठ्यौ स्तः कृष्णेन कृष्णस्य वा तुल्यः संद २४

शः समो वा प्रकृष्टः अतुलोपमाभ्यां किं शेषे षष्ठ्येव तुल्योपमा कृष्णस्य नास्ति चतुर्थी चाशिष्या
युष्यमद्रभद्रकुशलसुखार्थहितैः आयुष्यादियोगे षष्ठी चतुर्थ्यौ स्तः आशिषि कृष्णाय कृष्ण
स्य वा चिरं जीवितं भूयात् एवमायुष्यादिभिः हेत्वर्थानां करणे षष्ठी वा फलैः फलानां वा हेतुः
आधारोऽधिकरणं क्रियाश्रययोः कर्तृकर्मणोराधारोऽधिकरणसंज्ञः स्यात् सप्तम्यधिकरणे च अ
धिकरणे सप्तमी स्यात् चात् दूरांतिकार्थेभ्यः औपश्ले षिकं सामीपिकं विषयो व्याप्त इत्याधारश्च
तुर्धा कटे आस्ते स्थाल्यां पचति गंगायां घोषः सर्वस्मिन् स्थितः वनस्य अंतिके
दूरे वा क्तस्येन्विषयस्य कर्मण्युपसंख्यानं क्तस्येन्विषयस्य कर्मणि सप्तमी स्यात् अधीती व्याक
रणे साध्वसाधुप्रयोगे च साधुः कृष्णो मातरि असा धुर्मातुले चार्हाणां कर्तृत्वे तद्विपरीतत्वे च स
त्सु तरत्सु असंत आसते असत्सु तिष्ठत्सु संतस्तरंति असत्सु तिष्ठत्सु संतस्तिष्ठंति सत्सु तिष्ठत्सु असंत
+कर्मणि+ध स्तरंति निमित्तात्कर्मयोगे चर्मणि द्वीपिनं हंति यस्य च भावेन भावलक्षणं भावः क्रियायस्य
क्रियया क्रियांतरं लक्ष्यते ततः सप्तमी स्यात् गोषु दुह्यमानासु गतः गतः सप्तमीपंचम्यौ कारकमध्ये
कारकद्वयमध्यस्थयोः कालाध्वनोरेते स्तः अद्य भुक्त्वा द्व्यहे द्व्यहाद्वा भोक्ता इहस्थोऽयं क्रोशे
क्रोशाद्वा लक्ष्यं विध्येत् अधिकेन योगे पातिकेमिति लोके लोकाद्वाधिको हरिः अधीश्वर स्वामि

संबंधः अधिः कर्मप्रवचनीयः स्यात् यस्मादधिकं यस्य चेश्वरस्य वचनं तत्र सप्तमी अधिकार्थे ईश्वरा
र्थे च कर्मप्रवचनीयेन युक्ते सप्तमी स्यात् उपपरार्द्धे हरेर्गुणाः स्वात्स्वामिनोऽत्वासक्तिः अधि भुवि रामः
अधि रामे भूः षष्ठी चानादरे अनादराधिक्ये सा वलक्षणे सा च वा ततः षष्ठीसप्तम्यौ स्तः रुदती रुदतो वा
प्राव्राजीत् स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च एतैर्योगे षष्ठीसप्तम्यौ स्तः गवां स्वामी
गोषु स्वामी इत्यादि आयुक्तकुशलाभ्यां चासेवायां आ भ्यां योगे एतयोर्योगे षष्ठीसप्तम्यौ स्तः तात्पर्ये
र्थे आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा यतश्च निर्धारणं जातिगुणक्रियाभि
रेकदेशस्य पृथक्करणं यतः स्यात् ततः षष्ठीसप्त म्यौ स्तः नृणां नृषु वा द्विजः श्रेष्ठः
गवां गोषु वा कृष्णा गौर्बहुक्षीरा गच्छतां गच्छत्सु वा धावन् श्रेष्ठः पंचमी विभक्ते विभक्ते
निर्धारणाश्रये पंचमी स्यात् ऋद्धा वा दाक्षिणात्या। स्नःश्रोत्रियाः साधुनिपुणाभ्यामर्चायां
सप्तम्यप्रतेः आभ्यां योगे सप्तमी स्यात् मातरि साधुर्निपुणो वा अर्चायां किं साधुर्भृत्यो राज्ञः वक +स्व॰
वचनेन अप्रतेः किं साधुर्मातरं प्रति अप्रत्यादौ व्याप्तं साधुर्मातरं परिअनु प्रसितोत्सुकाभ्यां तृ
तीया च चात्सप्तमी प्रसितः प्रसक्तः उत्सुको वा हरिणा हरौ वा नक्षत्रे लुपि चेत् लुबंतान्नक्षत्रात्
तृतीया स्यात् अधिकरणे चात् पक्षे सप्तमी पुष्या पुष्येण वा गच्छेत् पुष्ययुक्तो कालः इत्यर्थः लुपि ३८

किं पुष्ये शनिः अकर्मकधातुयोगे देशकालाध्वभावा गंतव्याद्वितीयेति केचित् नदीं नद्यां वा
वसति रात्रिं रात्रौ वा शेते क्रोशं क्रोशे वा वसति याम्यं यामे वा तिष्ठति इति विभक्त्यर्थाः अः
समर्थः पदविधिः पदयोः पदानां वा विधिः समर्थः आश्रित एव स्यात् समासश्चतुर्धा पूर्व
पदार्थप्रधानोऽव्ययीभावः उत्तरपदार्थप्रधानस्तत्पुरुषः द्विगुकर्मधारयौ तत्पुरुषभेदौ अन्यपदा
र्थप्रधानो बहुव्रीहिः उभयपदार्थप्रधानो द्वंद्वः समासार्थबोधकं वाक्यं विग्रहः अव्ययं वि
भक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रति शब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसा
दृश्यसंपत्तिसाकल्यांतवचनेषु एषु अर्थेषु वर्तमानं सुबंतं समर्थमव्ययं सुबंतेन सम
र्थेन नित्यं समस्यते स समासोऽव्ययीभावः सं ज्ञः स्यात् एकपदं समासः प्रयोजनं विभक्तौ
सा च हरौ अधिकृत्येति विग्रहे हरौ अधि इति स्थिते प्रथमानिर्दिष्टं समास उपसर्जनं समासशा
स्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् उपसर्जनं पूर्वं समासे उपसर्जनं प्राक् प्रयोज्यमित्यर्थः इत्य
धेः प्राक् प्रयोगः कृत्तद्धितेति प्रातिपदिकत्वे सुपो धातुप्रातिपदिकयोः एतयोरवयवस्य सुपो लु
क् स्यात् स्वाकृत्यादिः अव्ययीभावाश्च अव्ययीभावोऽव्ययं स्यात् सुपो लुक् अधिहरि इत्यत्राक
था समर्थं किं संति गुणा हरौ अधि गच्छतान् अध्यानव्ययीभावसमासः समीपे कृष्णस्य उप अत्रप्रा

नतु अव्ययीभावो अव्ययो नामी वा ॥ वक्त नव्ययीभावे च आधाताचः कचिदुरा विशेषणमत्र ना । कालत्रये प्यभाव अत्यय: पुनरुक्त मस्य प्रसंगः इत्य र्थीनावाद्धि तत्ता नुवधपूरव्याते

अथ तत्समासादि नाव्ययीभावाद् तोस्त्वपंचम्याः अदंताद् अव्ययीभावात् सुलोन लुक् तस्य पंचमीं विना अमादेशः कृष्णस्य समीपं उपकृष्णं अपंचम्या इत्युक्तेः उपकृष्णात् इतः तृतीया सप्तम्यो र्बहुलं अदंताद् अव्ययीभावात् तृतीया सप्तम्योर्बहुलममभावः स्यात् उपकृष्णं उपकृष्णेन कार्यं उपकृष्णे स्थितः बहुलमिति क्वचित् स्यात् क्वचिन्न स्यात् क्वचिन्निषिद्धमपि स्यात् क्वचिद्वा स्यात् क्वचिदन्यथा स्यात् । तेन समुद्रं उन्मत्तगंगं इत्यादौ सप्तम्यां ॥ नित्यमव्ययीभावः समृद्धौ मद्राणां समृद्धिः सुमद्रं इद्धौ इर्सवनं अर्थाभावे अव्ययीभावश्च अव्ययीभावो नपुंसकं स्यात् स्त्रीत्व बाधकत्वात् मक्षिकाणामभावो निर्मक्षिकं अत्यये अतितानि हिमानि निर्हिमं असंप्रति नायं निद्रा कालः अति निद्रं नाश्चकार्यं तत्रापि ॥ तः पुरि पूरि पुरुष कालमप्रत्यर्थः पश्चाद्रथ लोः पश्चाद्रथ विष्णुः योगपता वीप्सा पदार्थानति वृत्तिः सादृश्यानि यथार्थाः रूपस्यायोग्यं अनुरूपं विष्णुं विष्णुं प्रतिविष्णुः आनुपूर्व्ये ज्येष्ठं अनुक्रमेण अनुज्येष्ठं यौगपद्ये अव्ययीभावे काले सह स्य सः स्यात् अव्ययीभावेनत्र काले चक्रेण युगपदेहि सचक्रं कालेन सहसत्वी कं सादृश्ये हरेः सादृश्यं सहरिः सहशोण हृतपि सादृश्ये स्यादिति सहशः सरव्या इति सख्य संपत्तौ क्षत्राणां संपत्तिः सक्षत्रं रूद्रे राधिकं सम्प्रीतिः अनुरूपं आत्मलाभः संपत्तिरिति भेदः साकल्ये तृणमप्य

नत्र अर्थ संपत्तिः सक्षत्रं नक्षमात् अनकच्युतो संपत्तिरित्य संकाश इति रित्यादि रूपे इत्याधिकाया आधिक्यं समृद्धिरित्यर्थः अनुरूप आत्मलाभः इति अनुरूपः सदाराग पः आत्मलाभः संपत्तिरित्यर्थः — ठली ५ अध: —

अंसं प्रतितिसंप त्यनावइत्यर्थः अनु नोपलोगस्य वस्तुनोग्या वर्ष्मावका लः तस्यैव निषेधः क्रियत इति अर्था भावाद् इत्ययात् एव वृच्यते — ७ —

३८

पाद्रिकदीर्घाद्विदीर्घ्यिक्ति कृत्त्वोबोदृष्णलोपे सस्य नित्य न्यायात् पाद्रिक उपकृष्णस्य स्यात् अग्रामि एवं तद्वे न्याजं तस्मा द्विप्रत्यादिटू तस्याप्रसिद्धत्वदत्र्या नाद्विति णिलोपं प्रत्यसिद्धत्वात् णिलोपः अग्रामि षातां अग्रामि षातां विपवद्विट्ः तावे अग्रामाधिषातां एवं तद्वाला विशात् मुनिना नोशलोपदेशस्य मां तस्मान्नावमेः मांतस्य मेरनुपधाया वृद्धिर्न स्यात् चिणि ञ्णिति कृति च तत्वावमेः अशामि अदमि अतन्वमेः किं आचामि कमिवमीत्याभि इति व्यवसाय अकारि अचामि अमहमूवि हमां नेति केचित् आमि अमि अचमि अक्षामि वधहिंसायां हनिवधोश्चौ तनहृद्धिः अवधि आयो विचिणलिङ्‌क्ते विधिः प्रजागारि एवं तज्जागतेंश्चिणा भूलोवा वृद्धिरिति केचित् अजागारी संजेच्या चिणि तंजेर्नलोपो वा स्यात् चिणि अराजि अतंजि विपुत्वाघाचिणकल्पत्वात्सादेनित्यं नुमागमो वा स्यात् चिणमनुलोपरतः अलंभि अलाभि अनस्थित्वाद्विकल्पात्वात्सादेनित्यं नुम् फलं यदा कर्मैव कर्तृत्वेन विवक्षते तदा सकर्मकाणामप्यकर्मकत्वात् कर्त्तरि भावे च लकारः कर्मवत् कर्मणा तुल्यक्रियः कर्मस्थया क्रियया तुल्यक्रियो यः कर्त्ता स कर्मणा वत् स्यात् कर्मवत्त्वात् यगात्मनेपद चिण् चिण्वदिट् स्फः उक्तं च क्रियमाणं तु यत्कर्म स्वयमेव प्रसिध्यति सुक

मे स्वगुणोर्थस्मा कर्मकर्त्तेति तद्धितः २ परत्वात् यापि आत्ने कर्मकर्त्तरि यायास्व्यः कर्त्तरि कर्म्म
त्यनुवृत्तो शेषात्कर्त्तरीति प्राप्तः कर्तृग्रहणात् कर्त्तृस्थक्रियः कर्मस्थक्रियपरस्मैपदं न कर्मकर्त्तरि
तद्यते काष्टं स्वयमेव अअकार्त्तुं स्मिडा कन्यात् उपमा अलेदि पच्यते ओदनः स्वयमेव अपा
च यदात्यावेल कारः तदा काष्टा कर्त्तरि इति या लात्तु तत्स्तिडा वाच्यस्येव कर्तृकर्मवदं
तेनात्र द्वितीया न तिप्यते काष्टेन तपस्तपः कर्म कस्येव तपः कर्मकस्येव तपतेः कर्त्ता कर्म
वत्स्यात् तप्यते तपस्तापसः तपोर्जयती त्यर्थः तपोउतापचेति कर्मकर्त्तरि चिण
न अतप्त तपः कर्मति किं अत्तपतिसुव र्णं अधावत् कटः कन्यस्तजोयकश्चि
णो कर्त्तरीति केचित् सृज्यते स्त्रजं लकः असर्जि कृषिराजाः पावांस्पन्मतरस्मै
पदंच अनयो कर्मकर्त्तरि रुपतरस्मैपदे। वास्तः कृष्यति कृष्यते वापादः स्वयमेव र
ज्यति रज्यते व्यवस्थित विकल्पत्वात् दर्थात्र केन च कोपि अरंजि अयः कर्मकर्त्तरि अ
जंतात् त्रिस्थिरा वास्यात् कर्म्मकर्त्तरि तङ्गुष्टे अकारि अकृत कटः स्वयमेव कुरुष्व अ
दोहि अदुग्ध न रुधः रुधते कर्म्मकर्त्तरि चिलन अरुद्ध पचकुशान्याधि कर्मकाण्या क
र्मकर्त्तानि कर्मवदि ति केचित् चिनोति हस्तः स्वयमेव पच्यते। धिकर्मका स्यापचक। ४०

लं अत्तीति मत्तणं अंतवत्तने अग्निग्रंथपर्यंतमधीत साग्नि यथासादस्य असादत्रोर्पर्य यथाशक्तः सु
पानित्यं समस्यते शादस्यम्ताभ्याय पत्तन्त्रं शक्तिमनतिक्रम्य करोतीति यथा शक्ति साद्दत्रो ऊय
था हरि हरि लघा हरः यावदवधारणे यावद्दित्ते तदवधारणोर्थ सुपानित्यं समस्यते सोव्ययीभाव
:यावंत श्लोकाः तावंतो च्युतप्रणामा यावत् श्लोकं अपपरिबहिरंचवः पंचम्याः एते पंचम्याः वा
समस्यंते सद्योनुसंज्ञः अपविष्णु संसारः अपवि ष्णोः परिविष्णुः परिविष्णोः बहिर्वनं बहिर्वना
त् प्राग्वनं प्राग्वनात् आङ्मर्यादाभिविध्योः अ ाङ्मर्यादार्थः पंचम्याः वा समस्यते आतिवि
धौ आबालं हरिः भक्तिः आबालेभ्यो बाल कृपानाति प्रती आति सुरवा चिक्कावाचि
नाद्दहव्यति प्रति आतिमुखार्थे वा समस्यतिस प्राक्संज्ञः अंत्यग्नि शलभाः पतंति अग्निम
ति प्रत्यग्नि अग्निं प्रति अनुयमूत्पया यस्यसमी पवाची अनुशब्दः स्यात्तेन सह पंचमी स्यात् था
सोव्ययीभावः अडेः समीपं अनुवि पक्षे अडेरनु यस्यचायामः यस्यदैर्घ्यवाची अनुस्तेन सहवा
समस्यते अनुगंगं काशी गंगायैर्घ्येण काशी दैर्घ्येन लक्षते तिष्ठदुप्रभृतीनि च कालविशेषति
ष्ठन्ति गावः तिष्ठंति गावो यस्मिन् कालेभंति तिष्ठदु एवंवहद्गु आयति गवं खलेयवं
लूनयवं पूतयवं संहृतयवं इत्यादि पारमध्येषष्ठ्या वा पारमध्य शब्दो षष्ठ्या वा समस्यते सोव्ययी

अत्यग्नि शलभा इत्यादि अग्निमति क्रांतशलभाः पतंतीति विग्रहं अतिक्रांतोऽतिक र्मच वर्त्तते यथा प्रति लक्ष्मणं अमि न कर्मप्रवचनीय युक्ते द्वितीयेत्य ग्निशब्दात् द्विता या अनुवाग्निर्लक्ष णेनेत्र लक्षणा तालक्षत अभि प्र तीआभिमुखार्थ नेत्र योग्य अभ्यग्नि प्रत्यग्नीती अग्निप्र तिमुखमग्न शलभा :पतंति निपात्वेत्तोम युक्तः इति पुली यते ~ पुली ६

त्वात्संज्ञः षष्ठीसमासादव्यादः एवं तत्त्वं चानयोर्निपात्यते पारे गंगायाः पारे गंगं मध्ये गंगं पक्षेत
त्पुरुषः गंगापारं गंगामध्यं महि विकल्पे न वाक्यमपि गंगायाः पारं संख्यावंश्येन वंश्योऽभि
धाविधायाजन्मतश्चैतत्र नावो वंश्यः तद्वाचिना संख्या वा समस्यते सज्ञाकः संज्ञः द्वौ मुनी वंश्यौ
श्चिमुनि त्रिमुनि व्याकरणस्य विद्यातश्चतामनेदविवक्षायां द्विमुनि त्रिमुनि व्याकरणं नदीभि
श्च नदीभिः संख्या समस्यते सोऽव्ययीभावः समा हारे वाच्यमिष्यते अव्ययीभावे सप्तगंगं द्वियमु
मुनं पंचनदं अन्यपदार्थे च संज्ञायां नदीभिः सह सुबंतं समस्यते अन्यपदार्थे नास्ति सिषा
क संज्ञः उन्मत्तगंगं देशः वाध्यकारेष्वा यं नित्यसमासः नहि वाक्येन संज्ञाग
म्यते नाम्नि किं शीघ्रगंगो देशः अव्ययीभा वे शरत्प्रभृतिभ्यः शरदादिभ्य टच् स्यात् स
मासांतः उपशरदं प्रति विपाशं शरत् विपाश् अस् मनस् उपानह् दिव् हिमवत् अनडु
ह् दिश् दृश् विश् चेतस् अयस् चतुर् त्यद् तद् यद् कियत् जराया जरस् उपजरसं प्र
तिपरसमनुभ्यो क्ष्णः परोऽक्ष्णः टच् स्यात् अव्ययीभावे अक्षि शब्दश्चि कृतसमं संज्ञायां तद्धि
ताः अतः परमा पंच माध्यायां ताः येष्वत्यस्यास्तु तद्धितसंज्ञा स्फः यस्मातिश्च परो क्षं प्रत्यक्षं प
रोक्ष मित्यत्र पारस्कादित्वात् सुट् समक्षं अन्वक्षं अनस्य अनंतादव्ययीभावाट्टच् नस्तद्धिते

५०

MEMORIAL
DR.

त्वात्संकर्मकर्त्तरि चिण्वत् अकृतवनेति केचित् अकामः फलं अडगघगौईघं नडुहस्तुंभमायक्कि
णो एषां कर्मकर्त्तरि यक् चिण्णो न स्तः कुदेरनेनयक् षिध्यते ति चिणात्मागेव कल्पितः कुषे इत्थस्तु
चिणुवड्डिटो न निषेध इति केचित् अस्मा विष्टस्तु क्रमेण रितिनेट् अस्मोष्ट नमेत अनंस्त णिश्रिद्रि
श्रिकात्मने पदाकर्मकाणां यक् चिणो न कारयते एवं ताक मर्मकर्त्तरि चंड इति केचित् अचीकरत
अकारिष्ट अ हे अग्रहिष्ट अग्रहीत कृत अवोचत आह्नतेश्च निष्ठ आवधिष्ट करिष्टोप
कुगदधिकस्तूपाश्वस्यः सनंतावयक्चिर णामस्तः श्रिअवकृति चिण्वद्रिडपि नेति के
चित् किरते अकीर्ष्ट गिरते अगीष्टश्रिथ ते श्रष्ट श्रिष्ट श्रष्टाइष्टनसिक्तलं कारितंम
न चतं सिष्ट चिकीर्ष्यते अ कीर्षिष्ट न्या दृश्यएपंतमिक्कर्म यत्पथाश्रि स्वकर्माणि प्र
त्ययंयांति कुत्स्यादिर्गणितेन्य उच्यथाकाविनि स्मुविजनम जागरी रजनी मगमिमहमद्या सं
त्यगं गोपी चाथ्रमकार्यतिलादचेनामनंतेन ठः इति भावकर्मप्रक्रिया अतिक्रावचने स्वट्
स्मृतिपर्यायधात्वर्थयोगे स्वतानद्यतने धतोर्ल्टट् स्यात् स्मरति कृष्ण कुलेष्यस्यात् नयदि यद्धक्षे
षा गुंजन अतिज्ञानामि कुलथक्रमेत्तुमदि विभाषा साकांक्षे यत्तदे न योगो याग पितृक्षेर्षे इष्वा
स्यात् लट्स्मलक्षणसंबंधे पयो कुरायां क्षायां स्मरति लसवषेवत्स्यामः वज्रागाश्चारयिष्याम का

उरूपं वा रणं लक्ष्यं पक्षे लुङ् । एवं यत्नेऽप्यक्षे परोक्षे लिट् चकार नन्नमपुरुषे वेत्ति त्वात्परोक्षं स
श्राह किं उचि लचि लुलाप अत्यंतापन्हवेपि लिट् नाहं कलिंगान् जगाम स्पातोर्लट् आस्यां
योगे लिट् स्यवे लङ् वा लिट् अपाठि किं जगाम किं आसन्नकाले किं कंसं जघान किं लट्
स्मे स्मयोगे लिङ् घ पिलङ् स्यात् यजति स्म युधिष्ठिरः अपरोक्षे लुङ् ननदा तनेपरोक्षे पि लट्
स्यात् यजति स्म युधिष्ठिरः अप एवं स्म पिता ब्रवीति ननोष्ठ प्रतिवचने ननु योगे लट्
लिट् ... प्रतिपतिवचने अकार्षीः किं॥ नन्वकरोमि नो नन्वोविलापा ननु आस्यां
योगे ... ईर्षद्रूस्यात् अकार्षीः किं नकरोमि नकार्षं अहं नु करोमि
अहं चकार्षम् ... ङ् वा न्नं पुरा शब्दाया गेस्यतनद्यतने लुङ् लृटौ वा मत्तः न त्रम या
ग प पक्षे य धा प्राप्तं वसंतीस्पुरा छात्राः अथ पस्य अवसत् अश्च की अश्मा किं यजति स्म
पुरायावस्पुरा निपातयोर्लट् आस्यांनिपाता स्यां योगे न भविष्यति काले धातोर्लट् स्यात् याव
न्नु क्र पुरा लुंके निपातयोः किं यावद्दास्यते तावद्भोदय रूते करणान्मत्याया पुरा यास्यति वि
नाषा कस्य कर्दि आस्यां योगे न भविष्यति लट् वा स्यात् पक्षे यथाप्राप्तं कदा करिष्यांति लुंके लो
स्यते ना लो वा किं ह ते लिप्सायां किमारूपं किं इति न च योगे न भविष्यति वा लट् स्यात् लिप्सा ४२

...मनु कृत्ये मित्याद्यि । अत्र अन्यत्र श्वस्य परपत्न नेन संबंध इति अश्वस्य माधनित्यने न अत्र कृता मितरा इच्योरन्यता ला वा नाममात्र ... स्वयमित्य सा व्यय वात् द्वितीया
मं बंधो नास्तीति द्वितीयाद्य इ एयुत राईमनुवलेल स्वयं कृतमितिश्रात मनो कृतमित्यर्थः वे कपदत्वमेक स्वर्थ च समासा कपात् ...

नांतस्य लस्य दिक्‌लोपः स्यात् लक्षिते उपराजं अध्यात्मं नपुंसकाद्वनाम रस्यं अन्नं तंयत् क्लीबं ततः इदंता
द्व्ययीभावाट्टच् वा स्यात् उपसर्मे उपचर्मं नदीपौर्णमास्याग्रहायणीभ्यः पल्यो वा टच् उपनदं उपन
दि उपपौर्णमासं उपपौर्णमासि इत्यादि झयः झयंतादव्ययीभावाट्टच् स्यात् वा उपसमिधम् उपस
मित् गिरेः सेनकस्य गिर्यंतादव्ययीभावाट्टच् स्यात् सेनकग्रहणं पूजार्थं उपगरं उपगिरि इत्यव्य
यीभावः द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः द्वितीयांतं सुबंतं समर्थैः श्रितादिभिर्वा स
मस्यते स समासस्तत्पुरुषः कृष्णं श्रितः कृष्णश्रितः इत्यादि गम्यादेरिष्टैः ग्रामं गामी
ग्रामगामी अन्नं बुभुक्षुः समर्थैः किं पश्य कृष्णं श्रितस्त्वं साधय स्वयं क्तेन स्वयं क्तेन
समस्यते सप्रकृ संज्ञः स्वयं कृतः खट्वा क्षेपे खट्वा द्वितीयायां ता क्तेन समस्यते निंदायां
खट्वारूढो जाल्मः सामि सामी त्यतदव्ययमर्धपर्यायः तत्सुबंतेन क्तांतेन समस्यते सामि कृतं
अर्धकृतमित्यर्थः कालाः कालवाचिनो द्वितीयांताः क्तेन समस्यते अनत्यंतसंयोगे मासप्रमित
श्चंद्रः अत्यंतसंयोगे च मुहूर्तं सुखं तृतीया तत्कृतार्थेन गुणवचनेन तृतीयांतं समर्थं तृतीयांतार्थकृ
तगुणेनार्थेन च समस्यते स तत्पुरुषः शंकुलया खंडः शंकुलाखंडः धान्येनार्थः धान्यार्थः तत्कृतेन
किं अक्ष्णा काणः समर्थैः किं नार्थः शंकुलया खंडो देवदत्तो ग्रामेणः समर्था वृत्तिः सर्वत्र समासे तद्वि

तृतीयान्त कृता तत्सदृशसमस्यते सु पंगु गिति तुल्याविर्रतत्रिकं गुणवचनेनेत्यपविशेषणं तृतीयांतेन गुणस्यकरणेन संबध्यते मासपूर्वादर्थ कते नेतिज्ञायते
इत्यंतेनतमिकृत्रा इहतृतीयार्थः कृतगुणेन तिृतीयांतेन कृतवृतीयांत कृतः तृतीयांत कृतो गुणो यस्य गुणिनः म तृतीयांत गुणो गुणीतद्वाचिनेत्यर्थः न
गुणवचनेनेति ... कर्तृकरणे ... कर्तरिकरणेवा कृ

तत्वज्ञेयाः पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः एभिः तृतीयां समस्यते मासेन पूर्वः मासपूर्वः एवं सदृशादौ अवरस्योक्तिः मासावरः कर्तृकरणे कृता बहुलं कर्तरि करणे च तृतीया कृदंतेन समस्यते बहुलं हरिणा त्राता हरित्रातः नखैर्भिन्नो नखभिन्नः कृत्यैरधिकार्थवचने कर्तृकरणवाचितृतीयांतं कृत्यैः समस्यते स्तुतिनिंदाधिक्यारोपे काकपेया नदी बाष्पच्छेद्यानि तृणानि कृत्यग्रहणेन यत्प्रत्ययो गृहीतः नेह काकैः पातव्याः अन्नेन व्यंजनं व्यंजनवाचितृतीयांतं अन्नवाचिना समस्यते क्षीरेण सिक्तः ओदनः क्षीरोदनः भक्ष्येण मिश्रीकरणं मिश्रीकरणवाचितृतीयांतं भक्ष्येण समस्यते गुडेन मिश्रा धानाः गुडधानाः चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः चतुर्थ्यंतं यत्तद्वाचिना अर्थादिभिश्चतुर्थी वा समस्यते तदर्थेन प्रकृतिविकारभावे यूपाय दारु यूपदारु अन्यत्र रंधनाय स्थाली अर्थेन नित्यं समासः सर्वलिंगता च द्विजाय अयं द्विजार्थः सूपः द्विजार्था यवागूः द्विजार्थं पयः भूतबलिः गोहितं गोसुखं गोरक्षितं पंचमी भयेन पंचमी भयेन समस्यते चोराद्भयं चोरभयं स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन वृकेभ्यो भीतः वृकभीतः वृकभीः बहुलोक्तेर्ग्रामनिर्गतः अधर्मजुगुप्सुरित्यादि अपेतापोढमुक्तपतितापत्रस्तैरल्पशः एभिः पंचमी कश्चित्समस्यते सुखाद्

पेतः सुखापेतः अल्पशः किं प्रासादात्पतितः इत्यादौ कश्चिन्न स्तोकांतिकदूरार्थकृच्छ्राणि क्तेन पंचम्यंतानि क्तेन समस्यंते स्तोकान्मुक्तः अल्पान्मुक्तः एवं सति कार्ये दूरार्थयोः कृच्छ्रान्मुक्तः स्तोकादिभ्य इत्यलुक् षष्ठी षष्ठ्यंतं सुबंतं समर्थेन वा समस्यते राज्ञः पुरुषः राजपुरुषः कृद्योगलक्षणा षष्ठी समस्यते इति वाच्यं षष्ठीसमासनिषेधापवादः व्यासस्य कृतिः लारतस्य श्रवणं जायकादिभिश्च एभिः षष्ठी समस्यते कृद्योगलक्षणानिषेधापवादः द्विजजायकः याजकः पूजकः परिचारकः परिवेषकः स्नातकः अध्यापकः उत्सादकः उन्मादकः उद्वर्तकः होता पोता भर्ता इत्यादय रथगणकेन समस्यते रथगणकः पत्तिगणकः न निर्धारणे निर्धारणे या षष्ठी सा न समस्यते नृणां द्विजः श्रेष्ठः प्रतिपदविधाना षष्ठी न समस्यते इत्यवाच्यं सर्पिषो ज्ञानं पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन एतैः षष्ठी न समस्यते पूरणे सतां षष्ठः गुणे पटस्य शौक्ल्यं स च प्रत्ययांतो गुणवाचीत्यनिषेधते सदा गुणवाचिनां न निषेधः चंदनगंधः सुहितं फलानां तृप्तिमान् द्विजस्य कुर्वन् सतां कुर्वाणः अव्ययं सतां कृत्वा तव्य सतां कर्तव्यं तव्य तानानुबंधेन समासो न भवतीव द्विजकर्तव्यं समानाधिकरणे राज्ञो नलस्य सति समासे पूर्वनिपातानियमः स्यात् कर्मधारय

मासः स्यात्तदा द्वयोः रपि षष्ठ्यंतयोः प्रथमा निर्दिष्टत्वात्पूर्वनिपातो नियमेन स्यात् कर्मधारये तु ... त्पूर्वनिपातो नियम्यते इति कर्मधारयस्यादेवेत्यर्थः ...

ननु च तृजकाभ्यां कर्त्तरि याजकादिभिश्च व्यतत्तकर्त्तृ वज्रस्य न तेत्तु दा हत जित्वा शीक्ष्या इ॥ पत्यर्थत्वे च ब्राह्मणयाजकादीश्च तेन क्रियाया ष्ट: स ब्रजस्य न तेस्य यं तु क्रियायाष्ट: इतिभाव:

स्यादेव क्तेन च पूजायां। पूजार्थं विहितक्तेन षष्ठी न समस्यते। पूजोक्तिरुपलक्षणं पूजायां राज्ञां मतः बुद्धः पूजितो वा। अधिकरणवाचिना च क्तेन षष्ठीसमासो न। इदमेषामासितं भुक्तं गतं
च कर्मणि च उभयप्राप्तौ कर्मणि षष्ठीसमासो न। आश्चर्यो गवां दोहो गोपेन। तृजकाभ्यां कर्तृ
कर्त्तरि षष्ठ्याः तृजकाभ्यां न समासः ननु तः याजिका कर्त्तयव तृज विधानात् तथाप्येककर्तृषष्ठी
नेति ऋजुतरार्थः कर्तरिकिं इक्षुभक्षिका कर्त्ते शिवकर्त्रर्थः पाठः कर्त्तरि षष्ठ्या तृजकाभ्यां ष
ष्ठी न समासः अपां स्रष्टा वज्रस्य भर्त्ता पत्यर्थ तत्स्थाक्षस्य याजकादिभिश्च तत्समासः तत्त
र्त्ता सता मर्त्तकः नित्यं क्रीडाजीविकयोः षष्ठीसमासः उद्दालपुष्पभञ्जिका जी
विकायां दन्तलेखकः तृजकेनास्ति पूर्वापर ाधरोत्तरमेकदेशिनैकाधिकरणे पूर्वा
दयो ऽवयविना समस्यन्ते एकत्वे चेत् इदं षष्ठीसमा सापवादः पूर्वं कायस्य पूर्वकायः अपका
यः अधरकायः उत्तरकायः एकदेशिना किं पूर्वं नाभेः कायस्य एकाधिकरणे किं पूर्वं छा
त्राणां सर्वएकदेशेनाङ्गः समासः संख्याविशायेति ज्ञापकात् मध्याह्नः सायाह्नः अर्द्धं
नपुंसकं समांशवाच्यर्द्धशब्दः क्लीबे च तथा समस्यते अर्द्धं पिप्पल्याः अर्द्धपिप्पली क्लीबं किं
ग्रामार्द्धः द्रव्यैक्य एव अर्द्धं पिप्पलीनां द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां एतानि वा

त्त्ववत् पूरणगुणेति निषेधं बाधित्वा पाक्षिकषष्ठीसमासः द्वितीयं भिक्षायाः द्वितीयभिक्षा भिक्षाद्वि
तीयं एवं तृतीयादि तुरीयस्योपि: तुरीयभिक्षा भिक्षातुरीयं प्राप्तापन्ने च द्वितीयया एतेनातद्धत
एकद्वितीया समासः प्राप्तो जीविकां प्राप्तजीविकः जीविकां प्राप्तः आपन्नजीविकः जीविका
पन्नः कालाः परिमाणिना परिमाणवद्वाचिना कालाः समस्यन्ते मासो जातोस्य मासजातः सप्त
मी शौण्डैः सप्तम्यन्तं समर्थं शौण्डादिभिर्वा समस्यते सतत्पुरुषः अक्षेषु शौण्डः अक्षशौण्डः
अक्षशौण्डः धूर्त्तकितवव्याडसंवीतअन्तर अधिकपटुपण्डितकुशलचपलनिपुण
कर्तृकरणे कृता बहुलमिति बहुलोक्तेर त्र आपि द्वितीयादि। वा नकारोनां प्रयोग
वशात् समासो ज्ञेयः सिद्धपक्वशुष्कबन्धैश्च एतैः सप्तमी समस्यते सतत्पुरुषः कांपिल्य
सिद्धः आतपशुष्कः स्थालीपक्वः चक्रबन्धः ध्वांक्षेण क्षेपे ध्वांक्षेण सप्तम्यन्तं समर्थं समस्यते क्षे
पनिंदायां सतत्पुरुषः तीर्थध्वांक्ष इव तीर्थध्वांक्षः अनवस्थितइत्यर्थः कृत्यैर्ऋणे कृत्यैः सप्तम्य
न्तं समस्यते सतत्पुरुषः ऋणेव्याप्ते मासे देयं मासदेयं ऋणं ऋणग्रहणं नियोगोपलक्षणार्थं
पूर्वाह्णे गेयं साम सप्तम्या अलुक् संज्ञायां संज्ञायां विषये सप्तम्यन्तं सुपा सह समस्यते सतत्पुरु
षः अरण्येतिलकः नित्यसमासएवायं न हि वाक्येन संज्ञा गम्यते तत्र तत्रेत्येतत् क्तान्तेन समस्यते

सतत्पुरुषः तत्रकुतं कुपेनिंदायां मसमस्यंतंक्रांतेन समस्यते सतत्पुरुषः अर्द्धकेविशीर्षे तत्पुरुषे
कृत नकुलमित्यलुक पात्रे समिताद्यश्च कुगतिप्रादयः कुत्साद्यो गतिसंज्ञा प्रादयश्च समर्थेनानि
त्यं समस्यते सतत्पुरुषः कुपुरुषः गतिः उरीकृत्य समासत्वादत्वो ल्यप् अत्र सुप्सुपेत्यनेन
वनेनापि समासः ऊरीकरोति उररीकरोति प्रादिः प्रकृत्य करोति ऊर्यादिच्विडाचश्च ऊर्या
दयश्च्यंता डाजंताश्च गतिसंज्ञाः स्युः अनुकरणे सत् असत् कारिका अलंकारा अंत रमन
स् पुरस् अस्तं अदस् तिरस् एषामव्ययानां प्रादीनां च गतिश्चेत्यादिभिः सूत्रैः अर्थवि
शेषे क्रियायोगे गतिसंज्ञया ज्ञया अव गत्यर्थवदेश अवगत्य अवगच्छति अवो
य अवदत् इति तिरस् उपाभे अव्याजे सा क्रा त्सत्कतीभिव उररी मतमिमध्ये पदे निर्वचने
च एते कृञि परे विभाषा कृञीत्यानिर्वा गतिसंज्ञा तिरसोन्यतरस्यां गतिसंज्ञकस्यातिरसो विस
कृनीयस्य सोवास्यात् कृत्वो पचतः तिरस्कृत्य तिरःकृत्य तिरः कृत्वेत्यादि हस्तेपाणौ प्राध्वंजी
विकार उपनिषत् एते कृञि नित्यं हस्ते पाणा वित्यादिनि नित्यंगतिसंज्ञाः स्युः हस्ते कृत्येत्यादि प्रादयोग
ताद्यर्थे प्रथमया प्रगत आचार्यः प्राचार्यः प्रांतेवासी अत्यादयः क्रांताद्यर्थे द्वितीयया अतिक्रां
तो मालामिति विग्रहे एकविभक्ति चापूर्वनिपाते विग्रहे यन्नियतविभक्तिकं तदुपसर्ज ४७

नसंज्ञं स्यात् न तु तस्य पूर्वनिपातः गोस्त्रियोरुपसर्जनस्य गोंतस्त्रीप्रत्ययांतयोरुपसर्जनयोर्ह्र
स्वस्स्यात् अतिमालः अतिगंगः विभाषा गुहते अर्द्धपिप्पलीत्यादौ नोपसर्जनत्वं स्त्रीप्रत्ययांत
ग्रहणात् अतितंत्रीः अतिलक्ष्मीः अतिश्रीः इत्यादौ कास्वेन ईयसो बहुव्रीहौ नं बहुश्रेय
सीराजा अवादयः क्रुष्टाद्यर्थे तृतीयया अवकृष्टः कोकिलया अवकोकिलः पर्यादयो ग्ला
नाद्यर्थे चतुर्थ्याः परिग्लानोध्ययनाय पर्यध्ययनः अलं कुमार्यै अलंकुमारिः निरादय
क्रांताद्यर्थे पंचम्याः निष्क्रांतः कौशांब्याः निष्कौशांबिः इवेन नित्यसमासः विभक्तिलोपश्च
ताविवबाससीव कर्मप्रवचनीयानां नसामासः हृद्यं प्रति पूर्वकालैक सर्वजरत्पु
राणनवकेवला समानाधिकरणेन एतेसामानाधिकरणेन समस्यंते स तत्पुरुषः पूर्वं
कालास्त्वपरकालार्थेन पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः तत्पुरुषः समानाधिकर
णः कर्मधारयः समानाधिकरणस्तत्पुरुषः स कर्मधारयाख्यः समासः स्यात् पुंवत्कर्मधारयजा
तीयदेशीयेषु कर्मधारयजातीयदेशीयेषु परतो भाषितपुंस्कमनूङंतं पूर्वं पुंवत्स्यात् पुं
वत्वात् स्त्रीप्रत्ययलोपः पाचका चासौ नारी च पाचकनारी कोपधाद्यप्रतिषेधः पुंवत् कर्मधारया
दौ प्रतिप्रसूयते पाचिका चासौ स्त्री च पाचकस्त्री पंचमस्यां स्त्रोघ्नस्यां सुकेश्यादौ वा

ब्राह्मणानां एवं पाकजातीया पाचकदेशीयेत्यादि सर्वदेवाः जरत्पतिरित्यादि उपमानानि स
मानवचनैः उपमानोपमेययोः धर्मवचनैरुपमानानि समस्यन्ते घन इव श्यामः घनश्यामः उप
मितं व्याघ्रादिभिः सामान्याप्रयोगे उपमेयमुपमानैर्व्याघ्रादिभिः समस्यते पुरुषोयं व्याघ्र
इव पुरुषव्याघ्रः सामान्याप्रयोगात् किं पुरुषोयं व्याघ्र इव शूरः विशेषणं विशेष्येण बहु
लं सदकं सुबंतं तेन समानाधिकरणेन सुबंतेन बहुलं समस्यते रक्तलता नक्तौतौ:
कृष्णसर्प इत्यादौ नित्यं रामो जामदग्न्य इत्यादौ न क्वचिद्वा नीलं उत्पलं नीलोत्पलं.
क्तान्तानि क्तान्तैः अक्तान्तवचनानि। सुबंतानि क्तान्तवचनैः सह समस्य
न्ते तत्पुरुषः शाकप्रवृत्तिनिमित्तकत्वाद्यो। अयं समास इष्यते व्याकरणस्वरन
सूत्रैः निःप्रवृत्तिरित्यर्थः शाकपार्थिवः पा पापाणके क्तान्तैः पापाणकशाकाद्यास्तानि
ध्यायिनो क्तान्तवचनैः समस्यते पापकलालः श्रणक नापितः शाकपार्थिवादीनामुत्तरप
दलोपश्च शाकप्रियः पार्थिवः शाकपार्थिवः देवपूजको ब्राह्मणो देवब्राह्मणः नञ्
नञ्समर्थेन सुपा समस्यते नलोपो नञः नञो नस्य लोपः स्यात् उत्तरपदे तस्मान्नुडचि
लुप्तनकारान्नञ उत्तरपदस्यादेर्नुडागमः स्यात् अचि अश्वादन्यः अनश्वः धर्मविरुद्धो ४४

=खरेपर=१ ×धर्मः×

=नत्वान्तपानवेदीनामत्वनमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु
प्रकृत्यानञ्नागनागनाचारनाविकतमापितनोरलंदेदननस्वाल्तं
नवादिउभवाधा=

=पापवक्तिं=१ =निरायः=१

पापान्नावो अपापं नञो नलोपस्तिङि क्षेपे अपचसि त्वं जाल्म: निषेधार्थनकारस्य समा
सवान्नलोपाभावः नैकधेत्यादौ ज्ञेयः आन्महतः समानाधिकरणजातीययोः महत आका
रान्तादेशः स्यात् समानाधिकरणे जातीये च परे महादेवः घासकरविशिष्टः एपिवाच्यं जाती
यघासादौ तीक्ष्णस्यापवादं महत्वः प्रकाराः अस्या महाजातीया महाघासः महाकरः महा
विशिष्टः तद्धितार्थोत्तरपदसमाहारे च तद्धितार्थविषये उत्तरपदे च परतः समाहारे च वा
च्ये दिक्संख्ये एकार्थेन समस्यते समाहारे तत्पुरुषः पूर्वस्यां शालायां भव इति
विग्रहे दिक्पूर्वपदादसंज्ञायां ञः अस्माद्भवाद्यर्थे ञः प्रत्ययः स्यात् असं
ज्ञायां कर्मधारये इंवद्भावेवक्ते ञाति मित आदिवृद्धिः पौर्वशालः उत्तरपदे पूर्वा
शालाप्रियः दिक्समासेऽत्र नास्ति संख्या पूर्वा॥ द्विगुः तद्धितार्थेत्युक्तः त्रिविधः संख्यापूर्वो
×तइतिविग्रहेसं द्विगुः स्यात् पंचसु कपालेषु संस्कृतः पञ्च कपालेषु संस्कृत एव द्विगोर्लुगनपत्ये
स्कृतेनद्धः पत्र मा द्विगोर्निमित्तं यस्तद्धितोऽनपत्यार्थः प्राग्दीव्यति यस्तस्य लुक् स्यात् पंचकपालः पुरो
समर्थात् संस्कृतार्थे डासः अनपत्ये किं द्वयोर्मित्रयोरपत्यं द्वैमित्रिः पंचभिर्गोभिः क्रीत इत्यत्र द्विगौ कृते तेन क्री
यथाविहितप्रत्ययः तं तेनेति द्वितीयासमर्थात् क्रीतार्थे यथाविहितप्रत्ययः स्यात् इति ठक् अध्यर्धपूर्वद्विगोर्लुग
स्यात् नक्षस्य ४४=

संज्ञायां अध्यर्द्धपूर्वात् द्विगोः अपरस्याङ्गीयप्रत्ययस्य लुक् स्यात् असंज्ञायां पंचगुः अत्र
रपदं पंचगावो धनं यस्य तत्र द्विगौ कृतौ गोरतद्धितलुकि गोंतात् तत्पुरुषात् टच् स्यात्
समासांतः न तद्धितलुकि अवादयः ततो बहुव्रीहिः पंचगवधनः समाहारे पंचगव
समाहृता इत्यत्र संज्ञात्वात् द्विगुरेकवचनं द्विगोरर्थः समाहार एकवत्स्यात् स नपुंसकं
स्यात् स नञ्भावः स नपुंसकं स्यात् पंचगवं द्विगोरस्य नपरसमगवः देवगवः देवगवी अकारां
तोत्तरपदो द्विगुस्त्रियामिष्टः द्विगोरिति ङीप् त्रिलोकी आबंतो वा त्रिपद्ध त्रिपद्धी
अतोनलोपश्च वा स्त्रियां पंचतक्षं पंचा। पंचमी पात्रादौ न पंचपात्रं चतुर्
गं त्रिभुवनं तत्पुरुषस्यांगुलेः संख्याव्ययादेः संख्याव्ययादेरंगुल्यंतस्य तत्पुरुषस्याच्
प्रत्ययः द्वे अंगुली प्रमाणमस्य द्व्यंगुलं निर्गतमंगुलि भ्यः निरंगुलं अत्यंगुलं तत्पुरुषस्येति किं
पंचांगुलिर्हस्तः अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः एभ्यो रात्रेरच् स्यात्
संख्याव्ययादेः अहश्च रात्रिश्च अहोरात्रं इहेव द्वंद्वः एकवद्भावात् क्लीबता इतरत्र तत्पुरु
षः रात्राह्नाहाः पुंसि एतदंतास्तत्पुरुषाः पुंसि स्युः सर्वा रात्रिरिति सर्वरात्रः एकदेशः पूर्वं रात्रेः पूर्वरात्रः अ
पररात्रः संख्यातरात्रः पुण्यरात्रः त्रिरात्रः अतिरात्रः संख्यापूर्वस्य रात्रिशब्दस्य क्लीबता

समासांत ४४

४५

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारकम्

वाच्या द्विरात्रं राजाहः सखिभ्यष्टच् एतदंतात्तत्पुरुषाट्टच् स्यात् महाराजः नञ्तत्पुरुषे अतिराजः अती
